सुतःस्मृतःकानीनःकन्यकाजातोमातामहसुतोमतः।अक्षेनायांक्षतायांवाजातःपौनर्भवःसुतःदद्यान्मातापिता
वायंसपुत्रोदत्तकोभवेत।क्रीतश्चताभ्यांविक्रीतःकृत्रिमःस्यात्स्वयंकृतःदत्तात्मातुस्वयंदत्तोगर्भेविन्नःसहोढज।उत्प
न्नोगृहेयतेयस्तसोपिविद्वोभवेत्सुतः।उरसोजातऔरसः।पुत्रसचेधर्मपत्नी[illegible]।।उसर्वेणाधर्मविवाहोढाधर्म
पत्नीताभ्यांजातःऔरसःपुत्रोमुख्यःतत्समपुत्रकासुतः।तत्समःऔरससमःपुत्रिकायासुतःपुत्रिकासुतःअतएवौरस
समःयथाहवशिष्ठःअभ्रातृकांप्रदास्यामितुभ्यंकन्यामलंकृतांअस्यांजोयापतेपुत्रः।समेपुत्रोभवेदितितिअथ

100

वा पुत्रिकैव सुतः पुत्रिकासुतः सोप्यौरससम एव पित्रवंपवानामल्पत्वान्मात्रवपवानां वा इत्याद्यं यथाह वसिष्ठः ।रत
पुत्रः पुत्रिकैवेति तृतीयपुत्रः पुत्रिकैवेत्यर्थः द्यामुख्यापाणिस्कृपनकस्यौरसादपकृष्टः । अन्यक्षेत्रोत्पन्नत्वात् । छेत्रयः
जातस्तु सगोत्रेणेतरेण वा । इतरेण सपिण्डेन देवरेण वोत्पन्नः पुत्रः क्षेत्रजः गूढजः पुत्रो भर्तृगृहे प्रच्छन्न उत्पन्नो ह
धिकजातीयपुरुषजत्वपरिहारेण पुरुषविशेषजत्वनिश्चयाभावेपि सवर्णजत्वनिश्चये सति वेदितव्यः ।कानी
॥२००॥ कन्यायामुत्पन्नः पूर्ववत्सवर्णात्समातामहस्य पुत्रः प्रगूढा सा भवेत्तथा पितृगृहसंस्थिता अथ ऊढा तदा वोढुरे
अथाह मनुः । पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः । तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवमिति पौनर्भवस्तु
अक्षतायां क्षतायां वा पुनर्भ्वां सवर्णेनोत्पन्नः । मात्रा भर्त्रानुज्ञातया प्रोषिते प्रेते वा भर्त्तरि पित्रैतो भ्यो वा यव
स्मै दीयते स तस्य दत्तकः पुत्रः यथाह मनुः माता पिता वा दद्यातां यमद्भिः पुत्रमापदि । सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त
मः सुत इति आपद्ग्रहणादनापदि न देयः दानुरूपं प्रतिषेध तथा एकः पुत्रो न देयः न त्वेकं पुत्रं दद्यात्प्रतिगृ
ह्णीयाद्वेति वसिष्ठस्मरणात् । तथाऽनेपुत्रसद्भावेपि ज्येष्ठो न देयः ज्येष्ठेन सा मार्गेण पुत्री भवति मानवदृ

वपुत्रकर्यकारणे मुख्यत्वात्पुत्रप्रतिग्रहकारस्य पुत्रं प्रतिगृह्य परन्त्वं धूनाहूय परायत्तिर्वावेधनिवेशनस्य मध्ये व्याहृ
तिभिर्हुत्वा अदूरबांधवं बंधुसंनिकृष्टमेव प्रतिगृह्णीयादिति वासिष्ठेनोक्तः। अदूरबांधवमित्यत्यंतदेशभाषाविप्रकृष्टस्य प्रति
षेधः। एवं क्रीतः स्वयं दत्तः कृत्रिमेष्वपि योज्यं समानन्यायत्वात्। क्रीतस्तु पुत्रस्ताभ्यां मातापितृभ्यां मातापित्रा वा विक्रीतः पू
र्ववत्तथैवैकं पुत्रं ज्येष्ठं च वर्जयित्वा आपदि सर्वेण इत्येवापत्तु मनुनोक्तं क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमंतिकात्स्व
तकः सुतस्तस्य सदृशोऽसदृशो वापि वेतितं गुणैः सदृशोऽसदृशो वेति व्याख्येयं न जात्या स्वजातीयस्यैव प्रक्रांतत्वात्। कृ
त्रिमः स्यात्स्वयं कृतः। कृत्रिमस्तु पुत्रः स्वयं पुत्रार्थिना धनक्षेत्रप्रदर्शनादिप्रलोभनैः पुत्रीकृतो मातापितृविहीनस्त
त्सद्भावे तत्परतंत्रत्वात्। दत्तात्मा तु पुत्रः मातापितृविहीनस्तत्त्यक्तो वा तवाहं पुत्रो भवामीति स्वयं दत्तः उपनतः स
होढजः सुतः गर्भो यः स्थितो गर्भिण्यां परिणीतायां पः परिणीतः स वोढुः पुत्रः। अपविद्धो मातापितृभ्यां मुत्सृष्टो यो गृह्य
ते स गृहीतुः पुत्रः सर्वत्रः सवर्णे इत्येव। एवं मुख्यामुख्यपुत्रानुक्रम्य तेषां दायग्रहणे क्रमम् आह। पिंडदोंशहर
श्चैषां पूर्वाभावे परः परः। एतेषां पूर्वोक्तानां पुत्राणां द्वादशानां पूर्वस्य पूर्वस्याभावे उत्तर उत्तरः पिंडदः अंशहृदः

अंशाहरो धनहर्त्ता वेदितव्यः औरसे पौत्रिके पसमहापि औरसस्यैव धनग्रहणे प्राप्ते ज्यकदमाह मनुः पुत्रिकायां कृता
यां तु यदि पुत्रोऽनुजायते समस्तत्र विभागः स्यात् ज्येष्ठता नास्ति हि स्त्रिया इति। तथान्येषामपि पूर्वस्मिन्पूर्वस्मिन्स
त्यपुत्तरेषां पुत्राणां चतुर्थांशभागित्वमुक्तं वसिष्ठेन। तस्मिंश्चेत्प्रतिगृहीते औरस उत्पद्येत चतुर्थभागभागा
।१८। भागी स्यात् दत्तकः इति दत्तकग्रहणं क्रीतकृत्रिमादीनां प्रदर्शनार्थं पुत्रीकरणाविशेषात्। तथा च कात्यायनः उ
त्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः सवर्णा असवर्णास्तु ग्रासाच्छादनभागिन इति सवर्णाश्छेत्रजदत्तकाद
॥ स्मृ॥ यस्ते सत्यौरसे चतुर्थांशहरा असवर्णाः कानीनगूढोत्पन्नसहोढपौनर्भवास्तेत्वौरसे सति न चतुर्थांशहराः किं तु ग्रा
साच्छादनभाजनाः यदपि विष्णुवचनं अप्रशस्तास्तु कानीनगूढोत्पन्नसहोढजाः पौनर्भवश्च नैव ते पिण्डरि ॥
क्थांशभागिनः इति तदप्यौरसे सति चतुर्थांशनिषेधपरमेक औरसाधनभावे कानीनादीनामपि सकल
पित्र्यग्रहणमस्त्येव पूर्वाभावे परः। परः इति वचनात् यदपि मनुवचनं एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्र
भुः। आनृशंस्यार्थं तु शेषाणां प्रदद्यात्तु प्रजीवनमिति तदपि दत्तकादीनामौरसः प्रतिकूलत्वे निर्गुणत्वे च बोधितव्यं
तत्र क्षेत्रयस्याविशेषादर्शितस्तेनैव षष्ठांशं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात् औरसो विभजेद्दायं पित्र्यं

चममेव चेति प्रतिकूलत्व निर्गुणत्व समुच्चये षष्ठमंशमेकत्वरस द्वावे पंचमांशमिति विवेकः व्यां। पदयमनुना पुत्राणां ष
ड्वयमुपन्यस्य पूर्वषट्कस्य दायाद बांधवस्य मुत्तरषट्कस्या दायाद बांधवत्वमुक्तं औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च। गू
ढोत्पन्नोपविद्धश्च दायादा बांधवाश्च षट्॥ कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा॥ स्वयंदत्तश्च शौद्रश्च षडदायाद
बांधवाः इति तदपि स्वपितृसपिंड समानोदकानां सन्निहितारिक्थहरांतराभावे पूर्वषट्कस्य तद्रिक्थहरत्वमुत्तरषट्कस्य तु तन्नास्तीति बां
धवत्वं पुनः समानगोत्रत्वेन सपिंडत्वेनाचोदकप्रदानादिकार्यकरत्वं वर्गद्वयस्यापि सममेवेति स्पष्टं। गोत्ररिक्थे जनयितुर्न
भजेद्दत्रिमः सुतः। गोत्ररिक्थानुगः पिंडो व्यपैति ददतः। स्वधेत्यत्र दत्रिमग्रहणस्य पुत्रप्रतिनिधिप्रदर्शनार्थत्वात् पित्र्यधन
हारित्वं तु पूर्वस्याभावे सर्वेषामविशिष्टं न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुरित्यौरसव्यतिरिक्तानां पुत्रप्रतिनिधी
नां सर्वेषां रिक्थहारित्वप्रतिपादनपरत्वात् औरसस्यैकस्यैवौरसः पुत्रः पितृसम्भवसूनः प्रभुरित्यनेनैव रिक्थं न क्षेस्याक्ते
त्वात् दायाहरशब्दस्य दायापादानपि दापयेदित्यादौ पुत्रव्यतिरिक्तरिक्थभागिविषयत्वप्रसिद्धत्वारछ्या। वाग्निष्ठादिषु
वर्गद्वये पिकस्य विधत्वयेन पाठो गुणंच दगुणांद्विषयो वेदि। तथा। गौतमीये तु पौत्रे क्षैकयस्य दत्तामत्वेन पा

ठे विजातीयविषयः तस्मात्स्थितमेतत्पूर्वस्य पूर्वस्याभावे परः परोऽंशभागिति। पत्न्यादीनामेकजातीनामेकस्य
वान्न भवेत् सर्वास्तान् तेन पुत्रेण पुत्रिणो मनुरब्रवीदिति तदपि भ्रातृपुत्रस्य पुत्रीकरणसंभवे अन्येषां पुत्री
णातिषेधार्थं न पुनः पुत्रत्वप्रतिपादनाय पत्न्युत्सुतागोत्रजाबंधुरित्यनेन विरोधात् इदानीमुपसंहारव्याये
त्रैव निजममाह। सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः सजातीयेष्वयं पुत्रेषु अयं पूर्वाभावे परः परइत्य
विधिर्न भिन्नजातीयेषु। तत्र च कानीनगूढोत्पन्नसहोढापौनर्भवानां सवर्णत्वं जनकद्वारेण न स्वरूपाग
॥१०२॥ र्णजातिलक्षणाभावस्योक्तत्वात्। तथा अनुलोमजानां मूर्द्धावसिक्तानां। औरसेष्वंतर्भावात्तेषामपि भावे छे
दीनां दायहरत्वं बोधव्यं शूद्रापुत्रस्त्वौरसोऽपि क्षेत्रत्वेऽनागमन्याभावेऽपि न लभते। यथाह मनुः। यद्यपि स्यात्तु सत्
यद्यपुत्रोऽपि वा भवेत्। नाधिकं दशमाद्दद्यात् शूद्रापुत्राय धर्मतः। इति। यदि सत्पुत्रो विद्यमानो द्विजातिपुत्रोऽविद्यमा
जातिपुत्रो वा स्यात्। तस्मिन्मृते नष्टे च ज्ञातिर्वाऽन्यो वा सपिंडः शूद्रपुत्रपतद्धृता दशमांशाधिकं न दद्यादि
देव क्षत्रियावैश्यापुत्रयोः सवर्णापुत्राभावे सकलं धनं ग्रहणं गम्यते। अथ नाशूद्रधनविभागे विशे

पातोपि दास्यांशूद्रेणकामतोंशहरो भवेत्। मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिकं। अभ्रातृको हरेत्सर्वं दुहितॄणां सु
ताद्दृते। शूद्रेण दास्यामुत्पन्नः पुत्रः कामतः पितुरिच्छया भागं लभते पितुरूर्ध्वं यदि परिणीतापुत्राः संति तर्हि भ्रातरस्तं
दाशीपुत्रं धर्मभागिकं कुर्युः स्वभागादर्धं दद्युरित्यर्थः अथ परिणीतापुत्रा न संति तदा कृत्स्नं धनं दासीपुत्रोऽर्हति दु
पात्यदि परिणीता दुहितरस्तत्पुत्रा वा न संति तत्सदा वेत्वर्धभागिक एव दासीपुत्रः। अत्र शूद्रग्रहणाद्द्विजातीनां दा
स्यामुत्पन्नः पितुरिच्छया अप्यंशं न लभते नाप्यूर्ध्वं दूरत एव कृत्स्नं किंत्वनुकूलश्चेज्जीवनमात्रं लभते। मुख्यगौणसुता
दायं ग्रहणं तीति निरूपितं। तेषामभावे सर्वेषां दायादक्रम उच्यते। पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा तत्सुता गोत्रजा बां
धवः शिष्यः सब्रह्मचारिणः। एषामभावे पूर्वस्य धनभागुत्तरोत्तरः स्वर्यातस्य परलोकं गतस्य धनभाक्। धनग्राही
एषां पत्न्यादीनामनुक्रांतानां मध्ये पूर्वस्यापूर्वस्याभावे उत्तर उत्तरो धनभागिति संबंधः। सर्वेषु मूर्द्धावसि
क्तादिष्वनुलोमजेषु सतादिषु प्रतिलोमजेषु वर्णेषु च ब्राह्मणादिष्वयं दायग्रहणविधिर्दायग्रहणक्रमो वेदि
तव्यः। तत्र प्रथमं पत्नी धनभाक् पत्नी विवाहसंस्कृता पत्न्यौ यज्ञसंयोग इति स्मरणात्। एकवचनं च जाति

त्निप्राप्तेरा। अतश्च वर्ण्येत्सजातीया विजातीया अप्ययांशां विभज्य धनं गृह्णीति। वृद्धमनुरप्याह पत्न्याः समग्रधनसंब
वित्ति। अपुत्रा शयनं भर्तुः पालयंती व्रते स्थिता। पत्न्येव दद्यात्तत्पिंडं कृत्स्नमंशं लभेत चेति वृहद्विष्णुरपि। अ
धनं पत्न्यभिगामि तदभावे दुहितृगामि यच्च मूलधनं न वेतदेति। तथा अपुत्रस्यापि कुलयापन्नाद्दुहेतरो पिवा।
103 भावे पिता माता भ्राता पुत्राश्च कीर्तिता। वृहस्पतिरपि। कुल्येषु विद्यमानेषु पितृभ्रातृसनाभिषु। अस
प्रमीतस्य पत्नी तद्भागहारिणीति। इत्यादिरूपाणि च वाक्यानि लक्ष्यंते। तथा। भ्रातृणामप्रजाः प्रेयात्कश्चि
१०३॥ त्प्रव्रजेत वा विभजेरन्धनं तस्य शेषास्ते स्त्रीधनं विना॥ भरणं चास्य कुर्वीरन् स्त्रीणमायावितछयात्।
शय्यां चास्य रक्षेदच्छिद्रक्रियेतरास्वपीति पत्नीसद्भावेपि भ्रातृणां धनग्रहणं पत्नीनां च भरणमात्रं नगरदे
मनुनाप्युक्तं पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वेत्यपुत्रस्य धनं पितुर्वा भ्रातुर्वेति दर्शितं तथा। अनपत्यस्य
तादायमवाप्नुयात्। मातर्यपि च वृत्तायां पितुर्माता हरेद्धनं इति मातृपितामह्योश्च धनसंबंधो दर्शि
तश्चेनाभिपित्र्यांतस्यापुत्रस्य च रगामि द्रव्यं तदभावे पितरौ हरेपातां। ज्येष्ठा वा पत्नीति भ्रातृणां पि

छ्रा न्या वी

स्यापास्यपत्न्या। क्रमेण धनसंवंधो दर्शितः कात्यायनेनापि। विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत्। भ्राता वा
जननी वाथ माता वा तत्पितुः क्रमादिति एवमादीनां विरुद्धार्थानां वाक्यानां धारस्वरेण व्यवस्था दर्शिता पत्नी गृह्णीया
दित्येतद्वचनाज्जातं विभक्ते भ्रातृस्त्रीविषयं सा च यदि नियोगार्थिनी भवति कुतः एतन्नियोगसव्यपेक्षया पाः पत्न्या धन
ग्रहणं न स्वतंत्रा या इति पिता हरेदपुत्रस्येति वचनात्। तत्राव्यवस्थाकारणं वक्तव्यं। नान्यध्यवस्थाकारणमस्ती
ति गौतमवचनाच्च पिंडगोत्रर्षिसंवंधा रिक्थं भजेरन् स्त्री वानपत्यस्य वीतं चान्विच्छेतेति। अस्यार्थः पिंडगोत्रर्षिसं
वंधा अनपत्यस्य रिक्थं भजेरन् स्त्री गरिकं भजेत चादिवीजं लिप्सेतेति मनुरपि धनं यो विभृयाद्भ्रातुर्मृतस्य स्त्रि
मेव वा। सोपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनमिति अनेनैतद्दर्शयति विभक्तधनेपि भ्रातरि उपरते अपत्यहा
रेणैव पत्न्या धनग्रहणं संवंधो नान्यथेति। तथा विभक्तधनेपि कार्यायान्वयेपेक्षा नाद्या यो पुत्रमुत्पादयेत्तदि
स्म मस्तत्र विभागः स्यादिति धर्मो व्यवस्थित इति तथा वशिष्ठोपि रिक्थलोभा नास्ति नियोग इति रिक्थले
भ्ने नियोगं प्रतिषेधन्न निजोगद्वारकर्तव्यपत्न्या धनसंवंधो वान्यथेति दर्शयति नियोगाभावे तु पत्न्या भरणमा

वन्नारद्धवचनात्। नराणां वास्यं कुर्वीरन्‌ स्त्रीणां मनीवितच्छपादितियोगीश्वरेणापि किं त्वद्पतेअपुत्रायोबि
तश्चैषां न नत्वा। साध्वत्तपः निर्वास्याव्यभिचारिणप्रतिकूलास्त्वथैव चेति। अपिच द्वियातिधनस्य जज्ञार्थ
१०५ त्वात्स्त्रीणां च जज्ञेनधिकाराद्धनग्रहापयुक्तं। तथाच केनापि स्मृतं। जज्ञार्थं द्रव्यमुत्पन्नं तथानाधिकृतास्त
त्यो अरिक्थभाजस्ते सर्वपासाच्छादान न्नाजनाः यज्ञार्थं विहितं चित्तं तस्मा। न हि नियोजपेतारक्थानेषु धर्मकृ
च्चे धुनश्चीमूषविधर्मिश्चिति तद्दानुपपन्नं पत्नी दुहितरइत्यत्र नियोगस्यापुत्रतातः अप्रस्तुतत्वाच्च। असिचेदमत्र
॥१०५॥ वक्ष्यं ष न्याधनग्रहणे नियोगो वा निमित्तं तदुत्पन्नमपत्यं गतत्र नियोगस्यैव निमित्तत्वेऽनत्यादितपुत्रापा
अपि धनसंबंधः प्राप्नो। त्यकत्यन्नपुत्रस्य धनसंबंधोन प्राप्नोति अयतदपत्यस्यैव निमित्तचेत्तया सतिपुत्रस्यै
व धनसंबंधात्पत्नीति नारब्धव्यं अयस्त्रीणां पतिद्वारको धनसंबंधः पुत्रद्वारको वा नात्यथेति मितं। तद
प्यसत्। अध्यग्न्यध्याहवनिकं दत्तं च प्रीतिकर्माणि भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतमित्यादिवि
रोधात्। किंच। सर्वपुत्राणां वेपत्नी दुहितरइत्यारब्धं तत्र निपुत्रपाधनसंबंधवद्दाछिन्नजस्यैवेध

न संबंधशक्तो भवति स च प्रयोगे वा निहिता तद्दत्यपुत्रंप्रकरणे प्रतीतिनाशव्यं अथ पिंडगोत्रर्षिसंबंधा रिक्थं
भजेरन् स्त्री वा अनपत्यस्य बीजं वा लिप्सेतेति गौतमवचनात्। नियुक्ता या धनसंबंध इति तत्र प्रसक्तं न हि पदिवात्तं लि
प्सेत तदानपत्यस्य स्त्री धनं गृह्णीयादित्यस्माद्वचनादयमर्थः प्रतीयते किंत्वनपत्यस्य धनं। पिंडगोत्रर्षिसंबंधा।
भजेरन् स्त्री वा सा स्त्री बीजं गर्भं लिप्सेत संजाता वा भवेदिति तस्या धर्मान्तरोपदेशः। वाशब्दस्य पक्षेतवचनत्वेन बाध
यो प्रतीयते। अपि च संपताप एव धनग्रहणे पुत्रे न नियुक्तेया स्मृतिर्लोकनिंदिता। अपुत्रा शयनं भर्तुः पाल
यंती व्रते स्थिता। पत्न्येव दद्यात्तत्पिंडं कृत्स्नमंशं लभेत चेति संपतापा धनग्रहणमुक्तं। तथा नियोगाश्च निंदि
तो मनुना। नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः अन्यस्मिन्हि नियुंजाना धर्मं हन्युः सनातनमित्य
प्युक्तवारीत्यवचनं रिक्थलोभान्नास्ति नियोग इति तद्विवक्षितं संसृष्टिनि वा न भर्तरि प्रेते तस्या धनसंबंधो न
स्यादिति स्वापत्यस्य धनसंबाधार्थं नियोगो न कर्तव्य इति व्याख्येयं॥ यदपि नारदवचनं भ्रातॄणां चाप्रजः कुर्वीरन्
स्त्रीणामाजीवितक्षयादिति तदपि संसृष्टिनां तया भागस्तेषामेव स्यादिपातादिति संसृष्टिनां प्रसक्तत्वात्॥

कि

तत्स्त्रीणामनपत्यानां तरणमात्रप्रतिपादनपरत्वात् न च मन्वादीनामपूर्वादित्येतस्य संसृष्टिविषयत्वे संसृष्टानां तु यो नागद
त्ये तेन पैतृकरूपस्य मासं कल्पनीयं। यतः पूर्वोक्तविचारेण स्त्रीधनस्याविभाज्यत्वं तत्स्त्रीणां च तरणमात्रं विधीयते। यद
प्यपुत्रा योषित स्त्रीयामित्यादिवचनं तत्नीवादिनां स्त्रीविषयमिति वक्ष्यते। यत्तु द्रव्यानि धनस्य यज्ञार्थत्वात् स्त्रीणां च यज्ञेना
धिकारात् तद्ग्रहणमयुक्तमिति तत् द्रव्यस्य तत्सर्वस्य द्रव्यपातस्य यज्ञार्थत्वे दानहोमाद्यसिद्धेः। अथ यज्ञशब्दस्य धर्मोपलक्षणत्वात्
105 दानहोमादीनामपि धर्मत्वात् तदर्थमविरुद्धमिति मतं एवं तर्ह्यर्थकामयोर्धनसाध्ययोरसिद्धिरेव स्यात् तथा सति धर्मर्थं च कामं।
॥१०५॥ च यथाशक्ति न हापयेत्। तथा न पूर्वाह्णमध्यंदिनापराह्णान् अफलान् कुर्यात् यथाधर्मार्थकामेभ्यस्तेषां। न वैतान् निराकांक्षेत संनियंतुमर्हे १४
व चेत्यादियाज्ञवल्क्यगौतममनुवचनविरोधः। अपि च धनस्य यज्ञार्थत्वे हिरण्यं धार्यमिति हिरण्यधारणस्य क्रत्वर्थता निराक
रणे न पुरुषार्थत्वमुक्तं प्रत्यक्षं स्यात्। किंच। यज्ञशब्दस्य धर्मोपलक्षणत्वे स्त्रीणामपि पूर्त्तधर्माधिकारात् तद्ग्रहणमपि युक्ततरं।
यत्तु पातंत्र्यवचनं न भार्या स्वातंत्र्यमर्हतीत्यादि तदस्तु पातंत्र्यं धनस्वीकारे तु को विरुद्धः केचित्तु हि यज्ञार्थं धनमुत्पन्नमित्यादिवच
नं उच्यते यज्ञार्थमेव धनमर्जितं यज्ञ एव विनियोक्तव्यं पुत्रादिभिरपात्येवं परं ततः। यज्ञार्थं लब्धमददत् भासः काकोऽपि वा भवे
दिति दोषश्रवणस्य पुत्रादिष्वप्यविशेषात् यदपि कात्यायनेनोक्तं अदत्ता पितृराजगामी राज्ञा न वर्तितो विहृत्य हृद हिकं च
मपास्य तत्स्त्रीणामशीनाच्छादनोपयुक्तं भोक्तृदेहिकं धनिनः श्राद्धाद्यपयुक्तं चापस्यापरिहृतं राजगामि भवतीति तेसंव च:

ज्ञस्यापवादः। श्रोत्रियद्रव्यंतु योषिद्धस्तयोर्द्वयोर्हि क्षमपास्य श्रोत्रियायोपपादयेदिति एतदप्यवरुद्धस्त्रीविषयं योषिद्ग्रहणेन नारदव
चनं चान्यत्र ब्राह्मणात्किंतु राजा धर्मपरायणः तत्स्त्रीणां जीवनं दद्यादेष दायविधिः स्मृतः इत्यविरुद्धस्त्रीविषयमेव स्त्रीशब्दग्रहणा
त्। इह तु पत्नीशब्दादूढापः संपतया धनग्रहणमविरुद्धं तस्माद्विभक्तोऽसंसृष्टिन्यपुत्रे स्वर्यातेपत्नी धनं पूर्णमं गृह्णातीत्य
जमर्थः सिद्धो भवति विज्ञानेश्वरस्याभिमत्वात्संसृष्टिनां वक्ष्यमाणत्वात् एते नाल्पधनविषयं करादिभिरुक्तं निरस्तं वेदितव्यं। तथा हि
रत्नेषु पुत्रेषु सत्स्वपि जीवद्विभागे अजीवद्विभागे च पत्न्याः पुत्रसमांशग्रहणमुक्तं यदि कुर्यात्समानांशान्पत्न्यः कार्याः समां।
शिकाः। तथा पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेदिति च तथा सत्यपुत्रस्य स्वर्यातस्य धनं पत्नीन्वरणतिरिक्तं नन्वन
त इति व्यामोहमात्रं यथ पत्न्यः कार्याः समांशिका इत्यत्र माताप्यंशं समं हरेदित्यत्र च जीवनोपयुक्तमेव स्त्री हरतीति
मतं तदसत्। अंशशब्दस्य समशब्दस्य चानर्थक्यप्रसंगात् स्यान्महेह धने जीवनोपयुक्तं धनं गृह्णात्यल्पेतु पात्रांशसमं
शं गृह्णातीति तच्च न विधिवैषम्यप्रसंगात्। तथा हि पत्न्यः कार्याः समांशिकाः माताप्यंशं समं हरेदिति वचद्वयं धने जी
वनमात्रोपयुक्तं वाक्यांतरमपेक्ष्य प्रतिपादयतीति अल्पे तु पुत्रांशसममंशं प्रतिपादयतीति। यथा चातुर्मास्ये द्वयोः
प्रणयंतीत्यत्र पूर्ववत्पक्षिणा सौमिकप्रणयनातिदेशो हेतुत्वेन न वैश्वदेववदुत्तरवेदिमुपकिरेतिन भुनासारायइत्क्रतेर

वेदिप्रतिषेधे दर्शिते राद्धान्तेकदेशिना न सौमिकप्रणयनाति देशादेशप्राप्तमपाऽत्तरवेधाः प्रथमोत्तरयोपर्वणोरपं प्रतिषे
धः किंतु पात्रवपंतीति प्राक्कारणिके न वचनेन प्राप्ताऽत्तरवेधाः प्रतिषेधो धोपान्नित्यत्वन्निहिते पूर्वपक्षिणो पात्रवपंतीति प्रथ
मोत्तरयोपर्वणोः प्रथममसौ प्रतिषेधमपेक्ष्य पाक्षिकामुत्तरवेदिं प्रापयतीति मध्यमयो। सक्तानि एवं द्वयमेव नित्यवदुत्त
106 रवेदिं प्रापयतीति विधिवैषम्यं दर्शितं द्वितं तु विधिवैषम्यं न पात्रप्रथमोत्तरयोपर्वणोरुत्तरवेदिप्रतिषेधो नित्यो न
वादो हूयोः प्रणयंतत्स्या घर्थवादपर्यालोचनयोपत्रवपंतीति मध्यमयो रेवरुणप्रघासस्साकमेधयोपर्वणोत्तरवे
।१०६॥ दिं विध्यन्तद्द इति द्दर्शितां। पदाप्यमितं हरेदपुत्रस्य रिक्थं भ्रातव चेति मनुस्मरणात् तथा स्वपतिस्पद्धपुत्रस्य पत्न्यादरणमि १६
दुब्धं तद्भ्रातावेपितरो हरेज्ज्ञातां ज्येष्ठावत्नीति शंखस्मरणाच्चापुत्रधनं भ्रातृगामीति प्राप्ते न्नरणं चास्य कुर्वीरन्स्त्रीण
मायाविंतच्छपादित्यादिवचनात् न्नरणेऽपपुत्रपत्नील्लन्न इत्यपि स्थितं एवं स्थिते वहुधनेऽपुत्रे स्वर्याते न्नरणेऽपपुत्रं पत्नी
गृह्णाति शेषं च ज्ञातरः पदातु पत्नी न्नरणमात्रोपपुत्रमेव द्रव्यमस्ति ततो न्यूनं वा तदा किं पत्न्यसवग्र ह्णातु तन्नातरो यातीति विरो २
धे पूर्ववत्नीपरस्त्व ज्ञापनार्थं पत्नी दुहितर इत्यारभ्य च मितित दृष्पत्र न वानावार्योनन्म्र षतिपतः पिता हरेदपुत्रस्य रिक्थं
भ्रातर एव चेति विकल्प्य स्मरणात् [illegible] क्रमपरं वचनं तु धनग्रहणेऽधिकारिप्रदर्शनमात्रपरं तस्सत्यपि पत्न्यादिगणे द्व

रतइतिव्याचष्टे।शेषवचनमपिसंसृष्टत्वात्तद्विषयमितिकिंचअल्पविषयत्वमस्माद्वचनात्प्रकरणाद्वानावगम्यतेधनभागु
त्तरोत्तरइत्यस्यचपत्नीदुहितरइतिविषयपदरूपेवाक्यांतरमपेक्ष्याल्पधनविषयत्वंपित्रादिषुधनमात्रविषयत्वमितिपूर्वो
क्तविधिवैषम्यंतदवस्थमेवेतिपत्निचैद्वेत्।यत्तुहारीतिवचनं।विधवायौवनस्थाचेन्नारीभवतिकर्कशा।आयुषः
क्षपणार्थंचदातव्यंजीवनंतदेतितदपिशंकितव्यभिचारायाःशकलधनग्रहणनिषेधपरं।अस्मादेववचनादशं
कितव्यभिचाराचारायाःसकलधनग्रहणंगम्यते।एतदेवाभिप्रेत्योक्तंशंखेन।ज्येष्ठागुणज्येष्ठा।अनाशंकितव्यभिचारायावकल
लंधनंगृहीत्वाअन्यासांकेशानामपिमातृवत्पालयतीतिसर्वमनवद्यं।तस्मादपुत्रस्यस्वर्यातस्यविभक्तस्यासंसृष्टिनोधनंप
रिणीतास्वासंपताशकलमेवगृह्णातीतिस्थितं।तदभावेदुहितरः।दुहितरइतिबहुवचनंसमानजातीयानामसमानजा
तीयानांचसमविषमांशप्राप्त्यर्थं।तथाचकात्यायनः।पत्नीभर्तुर्धनहरीयास्यादव्यभिचारिणी।तदभावेतुदुहितायद्य
नूढाभवेत्तदेति।बृहस्पतिरपि।भर्तुर्धनहारीपत्नीतांविनादुहितास्मृता।अंगादंगात्संभवतिपुत्रवद्दुहितानृणां
तस्मात्पितृधनंत्वन्यःकथंगृह्णातिमानवइति।तत्रचोढानूढासमवायेऽनूढैवगृह्णातितदभावेदुहितायद्यनूढातदभावेत्वदे
त्तिविशेषस्मरणात्तत्रापिप्रतिष्ठिताप्रतिष्ठितासमवायेप्रतिष्ठितैवतदभावेप्रतिष्ठितास्मा।धनेदुहितृहरणंपुत्रिणांसप्रति

छिता नां चेति गौतमवचनस्य पित्र्यधनेपि समानत्वात्। न चैतत्पुत्रिकाविषयमंतव्यं। तत्सुतः पुत्रिकासुत इति पुत्रिकापास्त
त्सुतस्य चौरससमत्वेन पुत्रप्रकरणे त्रिधानात्। चशब्दात् दुहितृ त्रभावे दौहित्रो धनभाक्। तथाह विष्णुः अपुत्रपौत्रसंता
ने दौहित्रा धनमाप्नुयुः पूर्वेषां तु स्वधाकारे पौत्रदौहित्रका मता इति। मनुरपि अकृता वापि यं विंदेत्सदृशात्सुतं। पौत्री मा
तामहस्तेन दद्यात्पिंडं हरेद्धनमिति। तदभावे पितरौ धनभाजौ माता पितरौ पद्यपि युगपदधिकरणवचनता पौर्वापर्यं द्वस्मरणात्तद
107 पवादहेचादेकशेषस्य धनग्रहणेपि जोः क्रमान प्रतीपते तथापि विग्रहवाक्ये मा शब्दस्य पूर्वनिपातात् एकशेषाभावप
क्षे च मातापितराविति मातृशब्दस्य पूर्वश्रवणात् पाठक्रमादेवार्थक्रमावगमाद्धनसंबंधेपि क्रमापेक्षायां प्रतीतक्रमानुरो
॥१०७॥ धेनैव प्रथमं माता धनभाक् तदभावे पितेति गम्यते। किंच पिता पुत्रांतरेष्वपि साधारणो माता तु न साधारणीति प्रत्यास
त्यतिशयात्। अनंतरः सपिंडाद्यस्तस्य तस्य धनं भवेदिति वचनान्मातुरेव प्रथमं धनग्रहणं युक्तं न च सपिंडेष्वेव प्रत्यासत्ति
र्नियामिका। अपितु समानोदकादिष्वप्यविशेषाद्धनग्रहणप्राप्ते प्रत्यासत्तिरेव नियामिकेत्यस्मादेवगम्यत इति। माता
पित्रोर्मातुरेव प्रत्यासत्त्यतिशयाद्धनग्रहणं युक्तं तदभावे पिता धनभाक् पित्रभावे भ्रातरो धनभाजः। तथा [illegible] पिता
हरेदपुत्रस्य रिक्थं भ्रातर एव चेति पत्युर्नहार्ये स्वरेणोक्ते अनपत्यस्य माता दायमवाप्नुयात् मातर्यपि च वृत्तायां पितु[illegible]माता

भा० प्र

हरेद्धनमिति। मनुवचनाज्जीवत्यपि पितरि मातरि च त्रयाणां पितुर्माता महा। धनं हरेत न पिता पतः पितृगृहीतं धनं पियाती पेक्षापि पुत्रे मुग
छितिपितामह गृहीतं तु सयाति पिव गच्छतीति पितामह्येव गृहीतिः तदप्याचार्यो नानुमन्यते विजातीयपुत्राणामपि धनग्रहणस्यात्रोक्त्वा
त्। चतुस्त्रिद्व्येकभागाः स्युरित्यादि नेति पत्युनर्हार्यं च ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिरिति मनुवचनं तद्द्रायमात्रानिप्रापं न पुत्रानिप्रापं
[illegible] पि सोदराः प्रथमं गृह्णीयुर्भिन्नोदराणां। मात्राविप्रकृष्टत्वात् अनंतरः सपिंडाद्यस्तस्य तस्य धनं भवेदिति मनुस्मरणात्। सोदराणा
मभावे भिन्नोदरा धनभाय भ्रातृणामप्यभावे तत्पुत्रा पितृक्रमेण धनभातः भ्रागभ्रात्रपुत्रसमच्छापे भ्रात्रपुत्राणामनधिकारः भ्रा
त्रभावे भ्रात्रपुत्राणामधिकारवचनात्। पदात्वपुत्रे भ्रातरि स्वर्यातेतत्दुत्राणामविशेषेण धनसंबंधे हृते भ्रा धनविभागात्प्रागेवपदि
कश्चिद्भ्राता मृतस्तदा तत्पुत्राणामप्यभावे गोत्रजा धनभायः। गोत्रयापि महीसपिंडासमानोदकाश्चेत त्र पितामही प्रथमं धनभा।
क् मातर्यपि च वत्रायां पितुर्माता धनं हरेदित्यस्य वचनस्य धनग्रहणाधिकारप्राप्तिमत्र परत्वात् उक्तमेतिसुतानंतरं पितामही।
गृह्णात्यवरोधात्। पितामह्याश्चाभावे समानगोत्रजाः सपिंडा पितामहादयो धनभायः। भिन्नगोत्राणां सपिंडानां धनशब्देन ग्रह
हणात्। तत्र च पितृसंतानाभावे पितामही पितामहः पितृव्यास्तत्पुत्राश्च क्रमेण धनभाजः पितामहसंतानाभावे प्रपितामही प्रपि
तामहस्तत्पुत्रास्तत्सूनवश्चेत्येवमासप्तमात्समानगोत्राणां सपिंडानां धनग्रहणं वेदितव्यं। तेषामभावे समानोदकानां धन
संबंधः। ते च सपिंडानामुपरि सप्तमे वेदितव्याः। जन्मनाम ज्ञानादधिकावाप्यथाहव्वहत्मनः। सपिंडता तु पुरुषे सप्तमे वि।

निवर्त्तते। समानोदकभावस्तु निवर्त्तते चतुर्दशात् जन्मनाम्नोः स्मृतेरेकेतत्परं गोत्रजमुच्यते इति गोत्रजाभावे बंधवो धनभाजः बंधवा
श्च त्रिविधाः आत्मबंधवाः पितृबंधवाः मातृबांधवाश्चेति यथोक्तं आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः। आत्ममातु
लपुत्राश्च विज्ञेया आत्मबांधवाः पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः पितुर्मातुलपुत्राश्च विज्ञेया मातृबांधवाः। मातुः पितृ
ष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः मातुर्मातुलपुत्राश्च विज्ञेया मातृबांधवाः इति तत्र चांतरंगत्वात्प्रथममात्मबांधवाः धनं तु ल
जस्तदभावे पितृबांधवस्तदभावे मातृबांधवा इति क्रमो वेदितव्यः बंधूनामभावे आचार्यस्तदभावे शिष्यः पुत्राभावे पः पुत्रस
१०८॥ सन्नः सपिंडस्तदभावे आचार्यः आचार्याभावे तेवासी त्यायस्तंवस्मरणात्। शिष्याभावे सब्रह्मचारी तदभावे ब्राह्मणद्रव्यं क
श्चिद्धोत्रियो गृह्णीयात् श्रोत्रियो ब्राह्मणस्यानपत्यस्य रिक्थं नडेरन्निति गौतमस्मरणात्। तदभावे ब्राह्मणमात्रं। यथाह मनुः स
वैषामप्यभावे तु ब्राह्मणा रिक्थभागिनः त्रैविद्याः शुचयो दांतास्तथा धर्मो न हीयते इति न कदाचिदपि ब्राह्मणद्रव्यं राजा ग
हृयात्। आहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिरिति। मनुवचनात् नारदेनाप्युक्तं ब्राह्मणस्यार्थस्य तन्नाशे दायादश्चे
न कश्चन। ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोन्यथेति। क्षत्रियादिधनं सब्रह्मचारिपर्यंताभावे राजा हरेन्न ब्रा
ह्मणः यथाह मनुः इतरेषां तु वर्णानां सर्वाभावे हरेन्नृप इति। पुत्रापौत्रश्च दायं गृह्णीतितदुभावे पत्न्यादय इत्युक्तं इदं।

नंतु तदुन्नयापवादमाह वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः वानप्र स्य स्य
यते। ब्रह्मचारिणः अक्रमेण प्रतिलोमक्रमेणाचार्यः सच्छिष्यो धर्मभ्रात्रेकतीर्थिनो धनस्य रिक्थस्य भागिनः ब्रह्मचा री ने
ष्ठिकः उपकुर्वाणकस्य तु धनं मात्रादय एव गृह्णन्ति नैष्ठिकस्य तु धनं तदपवादत्वेनाचार्यो गृह्णातीत्युच्यते यतेश्च ध नं स
च्छिष्यो गृह्णाति सच्छिष्यः पुनरध्यात्मशास्त्रश्रवणधारणतदर्थानुष्ठानक्षमः दुर्वृत्तस्याचार्यादेरपि धनग्रहणं न हि त्वात
वानप्रस्थस्य धनं धर्मभ्रात्रेकतीर्थी गृह्णाति धर्मभ्रातृप्रतिपन्नो भ्राता एकतीर्थ एकाश्रमी धर्मभ्राता चासावेकतीर्थी च
धर्मभ्रात्रेकतीर्थी एतेषामाचार्यादीनां मात्रादिपुत्रादिषु सत्स्वप्येकतीर्थी गृह्णाति। तन्वनंशास्त्वाश्रमान्तरगता इति वासिष्ठ
स्मरणादाश्रमांतरगतानां रिक्थसंबंधो नास्तीति कुतस्तद्विभागाः न चैनैष्ठिकस्यार्जितधनसंबंधः प्रतिग्रहादिनिषेधात् अ
निचयो निःक्षेप इति गौतमस्मरणान्निःक्षेपोऽपि स्वार्जितधनसंभवः उच्यते वानप्रस्थस्य तावत् अह्नो मासस्य षण्णां वा तथा
संवत्सरस्य वा। अर्थस्य निचयं कुर्यात्कृतमाश्वयुजे त्यजेदिति वचनाद्धनसंबंधोऽस्त्येव। यतेरपि कौपीनाच्छादनार्थं वस्त्रेवि
न्यासात् तथा योगसंभारभेदान् गृह्णीयात्पादुके तथा इति वचनात् वस्त्रपुस्तकादिसंबंधोऽस्त्येव। नैष्ठिकस्यापि शरीर
यात्रार्थवस्त्रादिसंबंधोऽस्त्येवेति तद्विभागकथनं युक्तमेव। इदानीं स्वर्यातस्य पुत्रस्य पत्न्यादयो धनभाज इत्युक्तं तस्य

पवादमाह। संसृष्टिनस्तु संसृष्टो विभक्तो धनं पुनर्मिश्रीकृतं संसृष्टं तदस्यास्तीति संसृष्टी। संसृष्टत्वं च न येन केनापि किं
तु पित्रा भ्रात्रा पितृव्येण वा। यथाह बृहस्पतिः। विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः। पितृव्येणाथ वा प्रीत्या स तत्संसृ
ष्ट उच्यते इति तस्य संसृष्टिनो मृतस्यांशं संभागं विभागकालेऽविज्ञातगर्भायां भार्यायां पश्चादुत्पन्नस्य पुत्रस्य संसृष्टो द
द्यात्पुत्राभावे संसृष्ट्येवापहरेत् गृह्णीयान्न पत्न्यादिः संसृष्टिनस्तु संसृष्टीत्यस्यापवदमाह। सोदरस्य तु सोदरः। संसृष्टिनस्तु
19 संसृष्टीत्यनुवर्तते अतश्च सोदरस्य संसृष्टिनो मृतस्यांशं सोदरः संसृष्टी स्वस्थानुजातस्य पुत्रस्य दद्यात्तदभावे पहरेत्
इति पूर्वसंबंधः एवं च सोदरासोदरसंसर्गे सोदरस्य तु संसृष्टिनो धनं सोदरः संसृष्टी गृह्णाति नान्योदरः संसृष्टीति पूर्वो
२१ क्तस्यापवादः। इदानीं संसृष्टिन्यपुत्रे स्वर्यातेसंसृष्टिनौ भिन्नोदरस्य सोदरस्य चासंसृष्टिनः सदृवेकस्य धनग्रहणमिति वि
वक्षायां द्वयोर्विभज्य ग्रहणे कारणमाह॥ अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत्। असंसृष्ट्यपि वाऽऽदद्यात्संसृष्टो नान्य
॥१०८॥ मातृजः॥ अन्योदर्यः सापत्नो भ्राता संसृष्टी धनं हरेत् न पुनरन्योदर्यो धनो हरेदसंसृष्टी। अन्वयेनान्वयव्यतिरेकाभ्यामा
न्योदर्यस्य संसृष्टित्वं धनोग्रहणे कारणमुक्तं भवति असंसृष्टीत्येतदुत्तरेणापि संबध्यते अतश्चासंसृष्ट्यपि संसृष्टि
नो धनमाददीत कोऽसावित्यत आह संसृष्ट इति संसृष्ट एकोदरसंसृष्टः सोदर इति यावत्। अन्येनासंसृष्टस्यापि
सोदरस्य धनग्रहणे सोदरत्वं कारणमुक्तं संसृष्ट इत्युत्तरेणापि संबध्यते तत्र च संसृष्टः संसृष्टात्पर्यः नान्यमातृजः

तत्रैव शब्दाध्याहरेण व्याख्यानं। कार्यसंसृष्ट्युत्पन्नमात्र एव संसृष्टिनो वचनं नाददीत एवं चासंसृष्ट्यपि वा दद्या

पि शब्दस्य वाणत्संसृष्टो नान्यमात्र एव वेद्यवधारणनिषेधात् असंसृष्टसोदरस्य संसृष्टभिन्नोदरस्य च विभज्य

स्त्रं कर्तव्यमित्यनेन भवति द्वयोरपि धनग्रहणकारणस्यैकैकस्य सद्भावात् एतदेव स्पष्टीकृतं मनुना। विभक्ताः सह

वंते विभजेरन् पुनर्यदि इति संसृष्टिविभागं प्रक्रम्याह ये ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः म्रियेतान्यतरो वापि तस्य

भागो न लुप्यते। सोदर्या विभजेयुस्तं समेत्य सहिताः समं भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभय इति वदता पेक्षात् भ्रात

णां संसृष्टिनां मध्ये ज्येष्ठः कनिष्ठो मध्यमो वा शांप्रदानतः अंशसंप्रदाने सार्वविभक्तिकस्तसिः विभागकाल इति यावत्

हीयेत तस्यांशाद्भ्रश्येत आश्रमांतरपरिग्रहेण वहन्हत्यादिना वा म्रियेत वा तस्य भागो न लुप्यते अतः पृथग्गृहस्थाने न संसृ

ष्टेन एव ग्राह्या पुरित्यर्थः तस्योक्तस्य विनियोगमाह सोदर्या विभजेयुस्तमिति तमुक्तं भागं सोदर्याः सहोदरा असंसृष्टा अपि

समेत्य देशांतरगता अपि समागम्य सहिताः संभूय समं न न्यूनाधिकभावेन ये च भ्रातरो भिन्नोदराः संसृष्टास्ते च सनाभ

यो भगिन्यश्च विभजेयुः समं विभज्य ग्राह्या पुरिति तस्यार्थः पुत्रपत्न्यादि संसृष्टिनापदायग्रहणमुक्तं तस्यापवादमाह क्ली

बोथ पतितस्तज्जः पंगुरुन्मत्तको जडः अंधोऽचिकित्स्यरोगाद्याश्च भव्याः स्युर्निरंशकाः। क्लीव स्त्रीतापप्रकृतिः पतितो ब्रह्महा

दिः तज्जः पतितोत्पन्नः पंगुः पादविकलः उन्मत्तकः वातिकपैत्तिकश्लैष्मिकसांनिपातिकग्रहावेशलक्षणैरुन्मादैरन्वि-
तः जडो विकलान्तःकरणः हिताहितावधारणाक्षम इति यावत् अन्धो नेत्रेन्द्रियविकलः अचिकित्स्यरोगः अप्रतिसमा-
धेयपक्षपादिरोगग्रस्तः आदिशब्देनाश्रमान्तरगतपितृद्वेष्युपपातकिबधिरमूकनिरिन्द्रियाणां ग्रहणं। यथाह वसिष्ठः अ-
110 नंशास्त्वाश्रमान्तरगता इति। नारदोऽपि पितृद्विट्पतितः षण्ढो यश्च स्यादौपपातिकः औरसा अपि नैतेंशं लभेरन् क्षेत्रजाः कु-
त इति। मनुरपि। अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः इति निरिन्द्रियो निर्ग-
तेन्द्रियः सम्यग्घ्राणादिनाशेन निरिन्द्रियः एते क्लीबादयो नांशारिक्थभाजो न भवन्ति केवलमशनाच्छादनेन भरणीया भवे-
१२०॥ युः। असरणे तु पतितत्वदोषः सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा। ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेदिति मनुस्मरणात् अ-
त्यन्तं यावज्जीवमित्यर्थः। एतेषां विभागात्प्रागेव दोषप्राप्तावनंशत्वं न पुनर्विभक्तस्य विभागोत्तरकालमप्यौषधा दि
ना दोषनिर्हरणे भागप्राप्तिरस्त्येव। विभक्तेषु सुतो जातः सवर्णायां विभागभागित्यस्य समानत्वात्। पतितादिभि र्यु
क्तिंगमविवक्षितं अतश्च पत्नीदुहितृमातादीनामप्युक्तदोषदुष्टानामनंशत्वं वेदितव्यं। क्लीबादीनामनंशत्वात् तत्पुत्रा
णामप्यनंशत्वे प्राप्त इदमाह। औरसाः क्षेत्रजास्त्वेषां निर्दोषा भागहारिणः। एतेषां क्लीबादीनामौरसाः क्षेत्रजाः पु
वा

णां निर्दोषाणामंशग्रहणविषयोऽधिकारे क्लीबादिदोषरहितानामंशग्रहणे नाधिकारी सोऽनर्हो भवंतीति तत्र क्लीबस्य क्षेत्रजपुत्रः संभवति अ
न्येषामौरसा अपि औरसक्षेत्रजपौत्रग्रहणमितरपुत्रव्युदासार्थं। क्लीबादिदुहितॄणां विशेषमाह॥ सुताश्चैषां प्रभर्तव्या यावद्वै भ
र्तृसात्कृताः। एतेषां क्लीबादीनां सुता दुहितरो यावद्विवाहसंस्कृता भवंतीति तावद्भरणीयाः संस्कार्याश्चांशात् क्लीबादिप
त्नीनां विशेषमाह॥ अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः। निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च॥ एषां क्ली
बादीनामपुत्राः पत्न्यः साधुवृत्तयः सदाचाराश्चेद्भर्तव्याः भरणीयाः व्यभिचारिण्यस्तु निर्वास्याः प्रतिकूलास्तथा निर्वास्या
भरणीया अव्यभिचारिण्यश्चेत्पुनः प्रातिकूल्यमात्रेण भरणमपि विनिवर्तनीयं॥ विभक्तेषु सुताः पित्रोरित्यत्र स्त्री
पुंसधनविभागं संक्षेपेणाभिधाय पुंधनविभागो विस्तरेणाभिहित इदानीं स्त्रीधनविभागं विस्तरेणाभिधा
स्यंस्तत्स्वरूपं तावदाह॥ पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतं। आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितं॥ पित्रा मात्रा प
त्या भ्रात्रा च यद्दत्तं यच्च विवाहकाले अग्नावधिकृत्य मातुलादिभिर्दत्तं आधिवेदनिकमधिवेदननिमित्तमधिविन्ना
स्त्रियै देयादिति वक्ष्यमाणं। आद्यशब्देन रिक्थक्रयसंविभागपरिग्रहाधिगमप्राप्तमेतत्स्त्रीधनं मन्वादिभिरुक्तं स्त्रीध
नशब्दश्च यौगिको न पारिभाषिकः योगसंभवे पारिभाषिकस्यायुक्तत्वात्पुनर्मनुनोक्तः। अध्यग्न्यध्यावहनिकं दत्तो

च प्रीतिकर्माणि। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनमिति स्त्रीधनस्य षड्विधत्वं तन्न्यूनसंख्याव्यवच्छेदार्थं नाधिकसंख्याव्य
वच्छेदाय अध्यग्न्यादिस्वरूपं च कात्यायनेनाभिहितं। विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसंनिधौ। तदध्यग्निकृतं सद्भिः स्त्री
धनं परिकीर्त्तितं यत्पुनर्लभते नारी नीयमाना पितुर्गृहात्। अध्यावहनिकं नाम स्त्रीधनं तदुदाहृतं। प्रीत्या दत्तं तु यत्किंचित्
श्वश्र्वा वा श्वशुरेण वा। पादवंदनिकं चैव प्रीतिदत्तं तदुच्यते। ऊढया कन्यया वापि पत्युः पितृगृहेपि वा। भ्रातुः सकाशात्पित्रोर्वा लब्धं
सौदायिकं स्मृतमिति। किंच। बंधुदत्तं तथा शुल्कमन्वाधेयकमेव च। बंधुभिः कन्यायाः मातृबंधुभिः पितृबंधुभिश्च यद्दत्तं।
।२२२।। शुल्कं यद्गृहीत्वा कन्या दीयते। अन्वाधेयकं परिणयनादनु पश्चादाहितं दत्तं। उक्तं च कात्यायनेन। विवाहात्परतो यच्च लब्धं भ
र्तृकुलाह॥ अतीतायामप्रजसि बांधवास्तदवाप्नुयुः। तत्पूर्वोक्तं स्त्रीधनं अप्रजसि अनपत्यायां दुहितृदौहित्रीदौहित्रपुत्रपौत्रर
हितायां स्त्रियां मृतायां बांधवा भर्त्रादयो वक्ष्यमाणलक्षणा गृह्णंति। सामान्येन बांधवानां धनग्रहणाधिकारिणां दर्शित
इदानीं विवाहभेदेनाधिकारिभेदमाह॥ अप्रजः स्त्रीधनं भर्तुः ब्राह्मादिषु चतुर्ष्वपि। दुहितॄणां प्रसूता चेच्छेषेषु पितृगा
मि तत्॥ अप्रजःस्त्रियाः पूर्वोक्ताया ब्राह्मदैवार्षप्राजापत्येषु चतुर्षु विवाहेषु भार्यात्वं प्राप्तायाः अतीतायाः पूर्वोक्तं
धनं प्रथमं भर्तुर्भवति तदभावे तत्प्रत्यासन्नानां सपिंडानां भवति शेषेष्वासुरगांधर्वराक्षसपैशाचेषु विवाहेषु तत्

प्रजः स्त्रीधनं पितृगामि मातृपितृगामि माता च पिता च पितरौ तौ गच्छतीति पितृगामि एकशेषनिर्देशात् अपि मातुः प्रथमं धनग्र
हणं पूर्वमेवोक्तं तदभावे तत्प्रत्यासन्नानां धनग्रहणं सर्वेष्वेव विवाहेषु प्रसूताऽपत्यवती च दुहितॄणां तदुक्तं भवति अ न
दुहितृशब्देन दुहितृदौहित्रा उच्यन्ते साक्षात् दुहितॄणां मातुर्दुहितरः शेषमित्यनेनोक्तत्वात्। अतश्च मातृधनं मातरि वृत्तायां प्रथ
मं दुहितरो गृह्णन्तीति तत्र चोढानूढासमवाये अनूढा गृह्णातीति तदभावे परिणीतास्तत्राप्यप्रतिष्ठिताप्रतिष्ठितासमवाये प्रतिष्ठ
ता गृह्णातीति तदभावे प्रतिष्ठिताः। यथाह गौतमः॥ स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां चेति च शब्दात्प्रतिष्ठितानां च
अप्रतिष्ठिता अनपत्या निर्धना वा। एतच्च शुल्कव्यतिरिक्तेन। शुल्कं तु सोदर्याणामेव। भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुरि
ति गौतमवचनात् सर्वासां दुहितॄणामभावे दुहितृदुहितरो गृह्णन्ति दुहितॄणां प्रसूता चेदित्यादिवचनात्। तासां भिन्न
मातृकाणां समवाये मातृद्वारेण भागकल्पना प्रतिमातृ वा स्ववर्गे विभागविशेष इति गौतमस्मरणात् दुहितृदुहितॄणां
समवाये किंचिद्देयं दातव्यं। यथाह मनुः। यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः। मातामह्या धनात्किंचित्प्रदेयं
प्रीतिपूर्वकमिति दौहित्रीणामभावे दौहित्रा धनहारिणः। यथाह नारदः। मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः
इति तच्छब्देन संनिहितदुहितृपरामर्शाद्दौहित्राणामभावे पुत्रा गृह्णन्ति तान्यपत्यानि तदन्वय इत्युक्तत्वात्। मनुरपि दुहि

त्रेणांपुत्राणामेवमन्यधनसंबंधं दर्शयति। जनन्यां संस्थितायां समं सर्वे सहोदराः भजेरन्मातृकं रिक्थं भगिन्यश्च सना
भ्य इति मातृकं रिक्थं सर्वे सहोदराः समं भजेरन् सनाभ्यो भगिन्यश्च समं भजेरन्निति संबंधः न पुनः सहोदराः। भ
गिन्यश्च संभूय भजेरन्निति इतरेतरशेषस्य द्वंद्वैकशेषाभावादप्रतीतेः विभागकर्तृत्वान्वयेनापि च शब्दोपपत्तेः। यथा
देवदत्तः। कृषिं कुर्याद्यज्ञदत्तश्चेति समग्रहणमुद्धारविभागनिवृत्त्यर्थः। सोदरग्रहणं भिन्नोदरनिवृत्त्यर्थं अप्रत्तपत्या हि
नज्ञातिस्त्रीधनं भिन्नोदराप्यत्र समज्ञातिसपत्नीदुहिता गृह्णातीति तदभावे तदपत्यं यथा च मनुः। स्त्रियास्तु यद्भवेद्वित्तं पित्रा
॥२१२॥ दत्तं कथंचन। ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेदिति ब्राह्मणीग्रहणमुत्तमजात्युपलक्षणमत एवानपत्यवैश्या
धनं क्षत्रिया कन्या गृह्णाति पुत्राणामभावे पौत्राः पितामहीधनहारिणः रिक्थं भाजनं ऋणं प्रकुर्युरिति गौतमस्मरणात्
पुत्रपौत्रैरृणं देयमिति पौत्राणामपि पितामहीमातृऋणाधिकारात् पौत्राणामप्यभावे पूर्वोक्तानंतरोदयो वा बंधुर्वा धनहारि
स्त्रीधनप्रसंगेन वाग्दत्ताविषये किं। विवाह दत्वा कन्यां हरन्दंड्यो व्ययं दद्याच्च सोदयं। कन्यां वाचा दत्वा अपहरन्द्रव्या
नुबंधाद्धनानुसारेण राज्ञा दंड्यः। एतच्चापहारकारणाभावे सति तु कारणे। दत्तामपि हरेत्कन्यां श्रेयांश्चेद्वर आव्र
जेदिति पहारानुज्ञानान्नदंड्यः प्रत्युत वाग्दानानंतरं निमित्तवरेण संबंधिनां कन्यासंबंधिनां चोपहारार्थं धनं व्यपाकृतं

तत्सर्वं सोदयं सवृद्धिकं कन्यादाता वराय दद्यात्। अथ कथंचिद्वाग्दत्ता संस्कारात्प्राङ्म्रियेत तदा किं कर्तव्यमित्यत आह
मृतायां दत्तमादद्यात्परिशोध्योभयव्ययं। यदि वाग्दत्ता मृता तदा पूर्वमंगुलीयकाद्युक्तं वा वरेण दत्तं तद्धरन्न्याददीत
परिशोध्योभयव्ययं। उभयोरात्मनः कन्यादातुश्च यो व्ययस्तं परिशोध्य विगणय्यावशिष्टमाददीत परं तु कन्यायै मा
महादिभिर्दत्तं शिरोभूषणादिकं च मातापितं तत्सहोदरा भ्रातरो गृह्णीयुः। रिक्थं मृतायाः गृह्णीयुः सोदरास्तदभावे पितुरिति बोधा
यनस्मरणात्। मृताऽप्रजाः स्त्रीधनं भर्तृगामीत्युक्ते इदानीं जीवन्त्याः सप्रजायाः अपि स्त्रिया धनग्रहणं क्वचिद्भर्तुरनुज्ञा
नमाह। दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके। गृहीतं स्त्रीधनं भर्ता न स्त्रियै दातुमर्हति दुर्भिक्षे कुटुंबभरणार्थं ध
र्मकार्येऽवश्यकर्तव्ये व्याधौ च संप्रतिरोधके वंदिग्रहणे निग्रहाद्युपायांतररहितः स्त्रीधनं गृह्णन् भर्त्ता न पुनर्दातुमर्हति प्रका
रांतरेणाहरन्दद्यात् भर्तृव्यतिरेकेण जीवंत्याः स्त्रिया धनं केनापि दायादेन न गृहीतव्यं। जीवंतीनां तु तासां ये तद्धरेयुः
स्वबांधवाः तान् शिष्याच्चोरदंडेन धार्मिकः पृथिवीपतिरिति दंडविधानात् तथा पत्यौ जीवति यः स्त्रीभिरलंकारो धृतो भवेत्
न तं भजेरन्दायादा भजमानाः पतंते इति देवलस्मरणाच्च। आधिवेदनिकं स्त्रीधनमनुक्तं तदाह॥ अधिविन्नस्त्रियै दद्यादाधि
वेदनिकं समं। न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्धं प्रकीर्तितं। यस्याः उपरि विवाहः स अधिविन्ना सा चासौ स्त्री चेत्यधिविन्नस्त्री त
स्यै अधिविन्नस्त्रियै आधिवेदनिकं अधिवेदननिमित्तं धनं समं यावदधिवेदनार्थं व्ययीकृतं तावद्दद्यात् यस्यै भर्त्रा

श्वसुरेण वा दत्तं स्त्रीधनं दत्ते पुनः स्त्रीधने आधिवेदनिकद्रव्यस्यार्धं दद्यात् । अर्धशब्दश्चात्र समप्रविभागवचनो न भवति अतश्च
यावता तत्पूर्वदत्तमाधिवेदनिकसमं भवति तावद्देयमित्यर्थः । एवं विभागमूलात्तत्संदेहे निर्णयहेतूनाह विभागनिह्न
वे ज्ञातिबंधुसाक्षिभिः लेखितैः । विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः । विभागस्य निह्नवे अपलापे ज्ञातिभिः पित्र्यैर्बं
भिः बंधुभिर्मातुलादिभिः साक्षिभिः पूर्वोक्तलक्षणैर्लेख्येन च विभागपत्रेण च विभागभावना ज्ञेया विभागनिर्णयो ज्ञातव्यः
113 तथा यौतकैः पृथक्कृतैर्गृहक्षेत्रैश्च पृथक्कृष्यादिकार्यैः पृथक्पंचमहायज्ञादिधर्मानुष्ठानेन च नारदेन विभाग
लिंगमुक्तं विभागधर्मसंदेहे दायादानां विनिर्णयः । ज्ञातिभिर्भागलेख्येन पृथक्कार्यप्रवर्त्तनात् । भ्रातॄणामवि
२२३॥ भक्तानामेको धर्मः प्रवर्त्तते विभागे सति धर्मोपि भवेत्तेषां पृथक्पृथगिति तथापराण्यपि विभागलिंगानि तेनैवोक्तानि
साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च विभक्ता भ्रातरः कुर्युर्नाविभक्ताः कथंचनेति ॥ इति रिक्थविभागप्रकर
णं । अथ सीमाविवादनिर्णय उच्यते सीम्नो विवादे क्षेत्रस्य सामंताः स्थविरादयः । गोपाः सीमाकृषाणाश्च
सर्वे च वनगोचराः नयेयुरेते सीमानं स्थलांगारतुषद्रुमैः । सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षितां । ग्रा
मद्वयसंबंधिनः क्षेत्रस्य सीम्नो विवादे तथैकग्रामांतर्वर्त्तिक्षेत्रमर्यादाविवादेन सामंतादयः स्थलांगा

रादिभिः पूर्ववल्लृप्तैः सीमान्तस्तरौ रूपलक्षितो चिह्नितां सीमां न नयेयुः निम्नानुपुः। सीमाक्षेत्रादिमर्यादा सा चतुर्विधा
जनपदसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति। सा च यथासंभवं चैतल्लक्षणा। तदुक्तं नारदेन। ध्वजिनी मत्सि
नी चैव नैधानी भयवर्जिता राजशासननीता सीमा पंचविधा स्मृतेति ध्वजिनी वृक्षादिलक्षिता वृक्षादीनां
प्रकाशरूपत्वेन ध्वजतुल्यत्वात् मत्सिनी सलिलवता मत्स्याधारस्य सा। धर जललक्षकत्वात् नैधानीति
खातं तु खांगारादिमती तेषां निखातत्वेन निधानतुल्यत्वात्। भयवर्जिता अर्थिप्रत्यर्थिपरस्परसंप्रतिपत्त्या नि
र्मिता राजशासननीता ज्ञातृचिह्नाभावे राजेच्छया निर्मिता। एवंभूतायाः सीमाया विवादः संभवति यथाह कात्यायनः
आधिक्यं न्यूनता चांशे अस्तिनास्तित्वमेव च। अभोगभुक्तिः सीमा च षट् विवादस्य हेतवः इति। तथाहि ममात्र पंच
निवर्तनानि भूमेराधिक्या भूरस्तीति केनचिदुक्ते पंचनिवर्तनैव नाधिकेत्याधिक्ये विवादः। पंचनिवर्तनानि मम
दायागतेत्युक्ते न ततो न्यूनैवेति न्यूनतायां पंचनिवर्तनानि मम अंश इत्युक्ते अंश एव नास्तीत्यस्ति नास्तित्व
विवादः। मदीया भूः प्राग्विद्यमानभोगैव भुज्यत इत्युक्ते न संततश्चिरं तन्नैव भुक्तेत्यभोगभुक्तो वि

वादः इयं मर्यादा इयं वेति सीमाविवाद इति षट्प्रकार एव विवादः संभवतीति षट्प्रकारेपि चास्मिन् विवादे उत्प
र्थोन्यां सीमाया अपि निर्णायमानत्वात्सीमानिर्णये प्रकरणेन तस्यांतर्भावः। समंतद्भवाः सामंताश्चतसृषु दिक्षु अ
११५ नंतरा ग्रामादयस्ते च प्रतिसीमं व्यवस्थिताः। ग्रामो ग्रामस्य सामंतः क्षेत्रं क्षेत्रस्य कीर्तितं। गृहं गृहस्य नि
र्दिष्टं समंतात्परिरभ्य तदिति कात्यायनवचनात् ग्रामादिशब्देन च तत्स्थाः पुरुषाः लक्ष्यंते ग्रामः पलायित इति
॥११५॥ वत्। सामंतग्रहणं च तत्संसक्तानामुपलक्षणार्थं अत एव कात्यायनेन संसक्तकास्तु सामंतास्तत्संसक्तास्तथोत्त
राः। संसक्तसक्तसंसक्ताः पद्माकाराः प्रकीर्तिता इति। स्थविरा वृद्धाः आदिग्रहणेन मौलाहृत या ... हणं। वृद्धादि
लक्षणं च तेनैवोक्तं निष्पाद्यमानं यैर्दृष्टं तत्कार्यं तद्गुणान्वितैः। वृद्धा वा यदि वा वृद्धास्ते तु वृद्धाः प्रकीर्तिताः ये त २
त्र पूर्वसामंताः पश्चाद्देशांतरं गताः तन्मूलत्वात्ते मौला ऋषिभिः परिकीर्तिताः। उपश्रवणसंभोगकार्याख्यातो
पचिह्निताः सीमासंनिहितक्षेत्रकाः सर्वे विचक्षणा गोचारावनवारिणो व्याधादयः ते च मनुनोक्ताः व्याधान् शाकुनि
कान् गोपान्कैवर्तान्मूलखानकान् व्यालग्राहानुंछवृत्तीनन्यांश्च वनगोचरानिति। स्थलमुन्नतान् प्रदे

लभी

शः नुषा धान्यत्वचः द्रुमान्पगेग्रा घादयः सेतुर्जलप्रवाहसंबंधः अघशब्देन वेणुवालकादीनां ग्रहणं। एता
च प्रकाशाप्रकाशभेदेन द्विप्रकाराणि भवंति। यथा च मनुः सीमावृक्षांस्तु कुर्वीत न्यग्रोधाश्वत्थकिंशुकान्॥
शाल्मलीशालतालांश्च क्षीरिणश्चैव पादपान्। गुल्मान्वेणूंश्च विविधान् शमीवल्लीस्थलानि च। शरान्कुब्जकगुल्मांश्
च तथा सीमा न नश्यति। तडागान्युदपानानि वाप्यः प्रस्रवणानि च। सीमासंधिषु कार्याणि देवतायतनानि चेति प्रकाशरू
पाणि। उपच्छन्नानि चान्यानि सीमालिंगानि कारयेत्। सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्ययं। अश्मनोऽस्थी
नि गोवालांस्तुषान् भस्मकपालिकाः। करीषमिष्टकांगारशर्करावालुकास्तथा। यानि चैवं प्रकाराणि कालाद्भू
मिर्न भक्षयेत्। तानि संधिषु सीमायामप्रकाशानि कारयेत्। एतैर्लिंगैर्नयेत्सीमां राजा विवदमानयोरिति प्रच्छन्नानि लिंगा
नि। एते प्रकाशाप्रकाशरूपे लिंगे सामंतादिप्रदर्शिते सामंता विवदमानयोः सीमानिर्णयं कुर्यात्।
राजा यदा पुनश्चिह्नानि न संति विद्यमानानि वा लिंगानि लिंगतया संदिग्धानि तदा निर्णयोपायमाह। सामंता वा स
मग्रामाश्चत्वारोऽष्टौ दशापि वा। रक्तस्रग्वसना सीमां नयेयुः क्षितिधारिणः। सामंताः पूर्वोक्तलक्षणाः समग्रामाश्च
त्वारोऽष्टौ दशापि वेत्येवं समसंख्याः प्रत्यासन्नग्रामीणाः रक्तस्रग्विणो रक्तांबरधरा मूर्द्धारोपितक्षितिखंडाः

सामंतेनपेयुः पुर्दीशपेयुः। सामंतावेतिविकल्पात्त्रिधानं स्मरत्यंतरात्साक्ष्यात्त्रिप्रापं। यथाह मनुः साक्षिप्रत्यय एव।
स्वात्सीमावादः विनिर्णय इति तत्र साक्षिणं निर्णीनत्वं मुख्यं तदभावे सामंतानां तदुक्तं। सस्य नावेपि चत्वारो ग्रा
115 माः सीमांतवादिनः सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधाविति। तदभावे तत्र संसक्तादीनां निर्णयत्वं। य
थाह कात्यायनः। स्वार्थसिद्धौ प्रदुष्टेषु सामंतस्वेर्थगौरवात्। तत्संसक्तैस्तु कर्तव्य उद्धारो नात्र संशयः। सं
सक्तसक्तदोषेषु तत्संसक्ताः प्रकीर्तिताः। कर्तव्यानप्रदुष्टास्ते राज्ञा धर्मविजानतेति। सामंताद्यभावे मौल
॥११५॥ दयो ग्राह्याः। तेषामभावे सामंतामौलवृद्धोद्धृतादयः स्थावरेषु द्विप्रकारेपि कार्यो नात्र विचारणेति कात्याय
नेन क्रमविधानात्। एते च सामंतादयः संख्यागुणातिरेकेण भवंति सामंताशोधनं पूर्वनिर्दोषाः स्युः गुणाच्चि ॥११
ताः द्विगुणास्तूत्तरे ज्ञेयास्ततोन्ये त्रिगुणा मताः इति स्मरणात्। ते च साक्षिणः सामंतादयः स्वैः स्वैः शपथै
शापिताः संतः सीमानं नयेयुः शिरोभिस्ते गृहीतोर्वी स्रग्विणो रक्तवाससः सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते
समंजसमिति मनुस्मरणात्। नयेयुरिति बहुवचनं द्वयोर्निरासार्थं। नैकस्य। एकश्चेदुन्नयेत्सीमां स

पवासः समुत्पन्ने पलाश रक्तमाल्याम्बरो भूमिमादाय मूर्धनीति नारदेनैकस्याप्यनुज्ञानात् यत्र नैकः समुत्पन्ने तत्र

नरः प्रत्ययवानपि गुरुत्वादस्य कार्यस्यानिष्पेषावहत्वस्थितेत्येकस्य निषेधः सोऽमपानुमतधर्मविद्यतिरिक्त

पदृत्यविरोधः स्थूलादिविहानावेपि सामिसामन्तादीनां सीमाज्ञाने उपायविशेषो नारदेनोक्तः निम्नगाप

हृतोत्सृष्टनष्टचिह्नासु भूमिषु तत्प्रदेशानुमानाच्च प्रमाणाद्भोगदर्शनादिति निम्नगपानयाप्यपहृते नष्ट

हारेण उत्सृष्टानि स्वस्थानात्प्रच्युतानि नष्टानि वालिङ्गानि यासु मर्यादा भूमिषु तत्र तत्प्रदेशानुमानात् उत्स

ष्टचिह्ना नां प्राचीनप्रदेशात्मानात् ग्रामादारभ्य सहस्रदण्डपरिमितं देशं क्रमस्य ग्रामस्य पश्चिमे नागङ्ग

त्येवंविधप्रमाणाद्भोगत्वर्यसमक्षमविप्रतिपन्नाप्यस्मार्तकालीनाप्यनन्तस्तेन कालेवा निश्चयमनुपूर्व हस्पतिना

अविरोधो दर्शितः आगमं च प्रमाणं च भोगं कालं च नाम चा भूनागं लक्षणं चैव ये विदुस्ते च साक्षिणः इति

एते च साक्षि सामन्तादयः शापिता सन्तः कुलादिसमक्षं राज्ञा प्रष्टव्याः यथाह मनुः ग्रामेयकुलानां समक्षं

क्षं सीम्नि साक्षिणः प्रष्टव्याः सीमलिङ्गानि तेषां चैव च वादिनारिति तेषां च प्रष्टासां साक्ष्यादयः समस्तारक

मत्स्यसीम्नि निर्णयं ब्रूयुः तैः निर्णीतसीमां तत्प्रदर्शितसकलचिह्नगर्त्तासाद्यपादिनामान्वितां वाऽविस्मरणार्थं
सीमां सर्वस्वैश्चैव नाम तत् इति। एते चासाक्षिसामंतप्रच्छन्नाः सीमाव्यक्रमणादिना रच्यपावत्पस्स ज्ञपं राज
दैवकं चान्यसर्वं नोत्पद्यते तदा तत्र तत्प्रदर्शिनात्सीमानिर्णयः। अपं च राज्ञो दैविकव्यसनावधि। कात्याय
११६ नेनोक्तं सामाचंचक्रमणे कोसपाद स्यपरीतथैव च। त्रिपक्षं पक्षसप्ताहं दैवा राजिकमीप्सित इति। पदात्वमास्वा
मुक्ते साक्षिवच सीत्रैपक्षान्यांतरे रोगादिदृश्यते अथवा पूर्तिवादिनिर्दिष्टत्र्यधिकसंख्यागुसाक्षपतर वि
॥११६॥ रुद्ध वचनतात्तदा ते मृषाभाषितया दंडनीयाः तदाह अन्यते तु पृथक् दंड्या राज्ञा मध्यमसाहसं अन्य
तेनिष्पावादिनिनिमित्तभूते सति सर्वे सामन्ताः प्रत्येकं मध्यमसाहसेन चत्वारिंशदधिकपणपंच
शतेन दंडनीयाः। सामंता विषयता चास्य साक्षिमौलादीनां स्मृत्यंतरे दंडांतरविधानादवगम्यते। तथा च म
नुः यथोक्तेन नयंतस्ते पूयंते सत्यसाक्षिणः। विपरीतं नयंतस्तु दाप्याः स्युर्द्विशतं दममिति। नारदोपि। अथ ते से
दन्यतं ब्रूयुः सामंताः सीमानिर्णये। सर्वे पृथक्पृथक् दंड्याः राज्ञा मध्यमसाहसमिति सामंतानां मध्य म

नएवोप्रयोगोनसाहसासामान्निर्णयतथापिलिंगदर्शनएव२

साहसदंडमभिधायशेषाश्चेदन्तरं तं वपुर्नियुक्तान्नूभिकर्माणि। प्रत्येकंतु ज्ञद्यन्यास्तेविनेयाः पूर्वसाहसमितिमंसस्ता
ग्र्यमंसाहसमुक्तवान्मैत्त्लादिनामपितमेवदंडमाह॥ मैत्त्लवद्धादयस्त्वन्येदंडगत्याप्रयक्पृथक्विनेयाः प्रथमैनैवसाह
न्तेतास्थितो इतिज्ञ्यादिग्रहणेनगोपशाकुनिकव्याधवनगोचरग्रहणं यद्यपिशाकुनिकादीनांपरतंत्रत्वाल्लिंगप्रदर्शव
म्रषानांषित्वसंज्ञवा दंडविधानमुपपद्यइ तिप्ननृतत्पृथक्दंडअत्येतदंडविधानमज्ञानविषयं॥ वहूनांतु
२२ हिंसानांनसर्वनिर्मिपंप्रादि। कुपुर्नेयाश्चेलोनाहुादंडास्तूत्तमसाहसमिति। ज्ञानविषयेसद्यादीनांकात्यायनेनदं
तरविधानात्तथासाक्षिवचनन्नोदेप्यपमेवदंडस्तेनैवोक्तः। कीर्त्तितेयदिन्नेदः स्यादंडास्तूत्तमसाहसमितिएवम
नादिनान्तवदनेसाक्ष्यादीनं दंडयित्वापुनः सामा विचारः प्रवर्त्तयितव्यः अज्ञानोक्तादंडयित्वापुनः सीमाविचार।
पोदित्कृतः। त्यक्तोदुष्टोस्तुसामंतानत्यान्मैत्त्लादिभिः सह। संमिश्यकारयेत्सीमां भेवंधर्मविदोविदुरितिनिसप्तप्र
कारस्तेनैवोक्तः। यदापुनः सामंतप्रभृतयोज्ञातारश्चिह्नानिचसंतितदाकथंनिर्णयइत्यतआह। अभावेज्ञातृचि
ह्नानांराजासीम्नः प्रवर्त्तिता। ज्ञानुएणंसामंतादीनांलिंगदीनांचवक्ष्यादीनामेभावेराजैवसीम्नः प्रवर्त्तिताप्र
वर्त्तमिता। अतएवोक्तमिताएपुर्ययः ग्रामद्वयमध्यवर्त्तिनीविवादास्पदाभूतोभुवंसमंप्रविश्य। अस्यायंत्नूरस्यषमि

१२५

त्यु न्नयोः समर्प्यातन्मे ध्येसीमान्लिंगां न्निकुर्यात्स्य दातस्यां न्नमाच न्मृतरस्योपकारातिरापोदरपतेतदातस्यै
वर्गनामस्य सकलन्नूः समर्पणीया। यथा मनुः। सीमायामविषक्ष्योपां स्वपराजैव धर्मवित्। प्रदर्शद्भूमि मेतश्चासु
पकारादितिस्थितिरिति। असत्यामप्यतदूर्वांशांकायामस्याः स्मतेर्न्यायमूलतां द्योतयितुमतिदेशमाह। आरामा
117 यतनग्रामनिपानोद्यानवेश्मसु। एष एव विधिर्ज्ञेयो वर्षांबुप्रवहादिषु। आरामः पुष्पमूलफलोपवपहेतु
र्भूभागः आयतनं निवेशनं पल्लात्तकुटीराद्यर्थं विनतो भूप्रदेशः। ग्रामः प्रसिद्धः ग्रामग्रहणेन च नगरादयोपलक्ष्ये
णार्थे निपानं पानीयस्थानं कूपवापीप्रभृतिकं। उद्यानं क्रीडार्था भूमिः वेश्म गृहं। एतेष्वारामादिष्वयमेव सी
११७॥ ह्यादिलक्षणो विधिर्ज्ञातव्यः तथा प्रवर्षणोदकजलप्रवाहेषु अन्तःपातिगृहयोर्मध्ये न जलावघः। प्रवहत्यन्योर्वे
८। त्येवंप्रकारे विवादे आदिग्रहणात्प्रासादे विप्रोचा न एष एव विधिर्वेदितव्यः तथा च कात्यायनेः। क्षेत्रकूपतडागानां
केदारारामयोरपि। गृहप्रासादावसथनृपदेवगृहेषु च। इति सामानिर्मिपमुक्तातत्प्रसंगेन मर्यादाप्रभेदनादौ दंडमाह
मर्यादाया। प्रभेदे तु सीमातिक्रमणे तथा। क्षेत्रस्य हरणे दंडाः अधमोत्तममध्यमाः। अनेके क्षेत्रव्यवच्छेदिका साध
रणीभूमर्यादा तस्याः प्रकर्षेण भेदने सीमातिक्रमणे सीमानमतिलंघ्य कर्षणे क्षेत्रस्य च न्यायादिप्रदर्शितेन

हरणे यथाक्रमेणाधमोत्तममध्यमसाहसादिदंडो वेदितव्यः क्षेत्रगृहहरणे चात्र गृहारामादिकूपतडागहरणार्थं।
पुनः स्वीयत्वोक्त्या क्षेत्रादिकमपहरति तदा द्विशतो दमो वेदितव्यः यथाह मनुः गृहं तडागमारामं क्षेत्रं चाभीष-
हरन्नाशतानि पंचदंड्यः स्यादज्ञानाद्द्विशतो दम इति। अपहृतिप्रमाणे क्षेत्रादिरूपस्वादिपर्यालोचनया कद
मे। दुत्रेपि दंडः प्रयोक्तव्यः अत एवाह वधः सर्वस्वहरणं पुरान्निर्वासनांकने। तदंगच्छेद इत्युक्तो दंडो
सोहस इति। यः पुनः परक्षेत्रे सेतुकूपादिकं प्रार्थनया अर्थदानेन वा लब्धानुज्ञो निर्मातुमिच्छति तन्निषेधे तत्क्षेत्र-
मिन एव दंड इत्याह न निषेध्यः प्रवर्तमानश्च सेतुः कल्याणकारकः। परभूमिं हरन्कूपः स्वल्पक्षेत्रोपद्रवक-
रवीयाश्च भूमिमपहरन्नाशप्रन्नापि सेतुर्जलपूर्वहवंधः। क्षेत्रस्य स्वामिनो न प्रतिषेध्याः स चेदीषत्पीडाकर-
हूपकारकश्च भवति कूपश्चाल्पक्षेत्रव्यापित्वेनाल्पबाधो बहूदकत्वेन बहूपकारी नैव निवारणीयः। कूपग्रहणं
वापीपुष्करिण्याद्युपलक्षणार्थं। यदा पुनः सेतुर्मत्क्षेत्रस्वामिनो बहुबाधो न च ग्रामादिसमीपक्षेत्रवर्तितया चाल्पोपकारस्त-
सौ निषेध्य इत्यर्थादुक्तं भवति। सेतुश्च द्विविधमुक्तो नारदेन सेतुश्च द्विविधः प्रोक्तः खेयो बंध्यस्तथैव च तोयप्रवर्तन-
याद्बंध्यः स्यात्प्रवर्तनादिति पदात्त्वन्यनिर्मितः सेतुं नेदनादिना नष्टं स्वयं संस्करोति तदा पूर्वस्वामिनं तं द्वर

पंवापृष्ट्वैव संस्कुर्यात्। यथाह नारदः। पूर्ववृत्तं समुत्सन्नमपृष्ट्वा स्वामिनं तु यः। सेतुं प्रवर्त्तयेत्कश्चिन्न स तत्फलभाग्भवेत्
मृतेपि स्वामिनि पुनस्तद्वंश्ये चापि मानवे राजानमामंत्र्य ततः कुर्यात्सेतुप्रवर्त्तनमिति। क्षेत्रस्वामिकं पृष्ट्वापि दृष्ट्वामिद
नामेतो। प्रवर्त्ते पितारं प्रत्याह। स्वामिनो यान्निवद्धैव क्षेत्रे सेतुं प्रवर्त्तयेत्। उत्पन्ने स्वामिन्नागस्तद् नावमहीपतेः क्षेत्र
॥५ स्वामिनः मन न्यपगमपतद नावेराजानो चापः परक्षेत्रे सेतुं प्रवर्त्तयति असौ फलभाग् भवति। अपि तु तदा
त्पन्ने फले क्षेत्रस्वामिनो भोगस्तद् नावेराज्ञस्तस्मात्प्रार्थनया र्थदानेन वा क्षेत्रस्वामिनं तद् नावेराजा नैवा
११८॥ ज्ञाप्यैव परक्षेत्रे सेतुः प्रवर्त्तनीय इति तात्पर्यार्थः। क्षेत्रस्वामिना सेतुर्न प्रवृत्तिश्चेद् इत्यत्र इदानीं तस्यैव प्रसक्तौ
नुप्रसक्ताद्वा चिद्दिध्यंतरमाह॥ फालाहतमपि क्षेत्रं न कुर्याद्यो न कारयेत्। तं प्रदाप्यामकृष्टं शदं क्षेत्रमन्येन कार
येत्य पुनः क्षेत्रस्वामिपाश्वे हमिदं क्षेत्रं कृषामीत्यंगीकृत्य पश्चादुत्सृड्डोति न चान्येन कर्षयति तच्च क्षेत्रपर
पिफालाहतमीषहलेन विदारितमपि न सम्यग्बीजचापार्हं तथापि तस्याकृष्टस्य फलं यावत्तावत्यत्र हे सा
तादिकल्पितं तावद सौ कर्षको दापनीयः तच्च क्षेत्रं पूर्वकर्षका दाच्छिद्यान्येन कारयेत्॥ इति सीमाविवादः

णं॥ व्यवहारपदानां परस्परं हेतुहेतुमद्भावान्नावात्येषामाद्यमृणादानमित्यादिपाठक्रमो न विवक्षित इति व्युत्क्रमेण स्वा
मिपालविवादो निरूप्यते॥ गोभिर्नष्टं तु महिषी सस्यघातस्य कारिणी। दंडनीया तदर्धं तु गौस्तदर्धमजाविकं॥ परस
स्यनाशकारिण्या माहिष्या अष्टौ माषा दंडनीया गौस्तदर्धं चतुरो माषान् अजमेषश्च माषद्वयं दंडनीयाः। महिष्या
दीनां च नसंबंधा न वा तत्स्वामी पुरुषो लभ्यते। माषश्चात्र ताम्रिकपणस्य विंशतितमो भागः। माषो विंशतिमो भाग
पणस्य परिकीर्तित इति नारदस्मरणात्। एतच्चाज्ञानविषयं ज्ञानपूर्वं तु। पणस्य पादौ द्वौ गां तु द्विगुणं महिषीं तथा।
अजाविके च सवत्से पादो दंडः प्रकीर्तित इति स्मृत्यंतरोक्तं द्रष्टव्यं। यत्पुनर्नारदेनोक्तं माषं गां दापयेद्दंडं द्वौ माषौ म
हिषीं तथा। अजाविके च वत्सानां दंडः स्यादर्धमाषिक इति तत्पुनः प्ररोहयोग्यसस्यावशेषभक्षणविषयं। अपराधातिश
येन तु चिरं दंडद्वैगुण्यमाह। भक्षयित्वोपविष्टानां यथोक्ताद्द्विगुणो दमः पदिपथपवः परक्षेत्रे ससस्यं चरक्षपित्वात्तैव
निवारिताः शेते रतत दा यथोक्तदंडाद्द्विगुणो दंडो वेदितव्यः। सवत्सानां पुनर्भक्षयित्वोपविष्टानां यथोक्ताच्चतुर्गुण
दंडो वेदितव्यः। वसंतां द्विगुणः प्रोक्तः सवत्सानां चतुर्गुण इति वचनात्। द्वे ग्रांत[illegible]वंतरस्थाः इति देशमाह॥ सम

स्तेषां विघाते पि खरोष्ट्रं महिषी समं । विघातः प्रचुरः तृण काष्ठोदकस्य मारणाः पुरुषः हीतो न्यूनप्रदेशाः तदुपघाते पीतरक्षेत्र
दंडने समं दंडमेषां महिष्यादीनां विघाते खरोष्ट्राश्वच खरैर्दंतं तन्महिषीसममहिषीपत्रे पादशेन दंडेन दं
११९ ड्यते तत्रैता दृशे नैव दंडेन खरोष्ट्रमपि पुत्रकं दंडनीयं सस्यापरोधकत्वेन खरोष्ट्रयोः पुत्रकं महिषीतुल्यत्वाद ।
अस्य चापरोधानुसारित्वात् खरोष्ट्रमिति समाहारोऽनविवक्षितः परसस्यविनाशे गोस्वामिनो दंडउक्तः इदा
नीं क्षेत्रस्वामिने फलमप्यसौ दापनीय इत्याह । पावत्सस्यं विनश्येत् तावत्स्यात् क्षेत्रिणः फलं गोपस्ताड्यस्तु गोमी
तु पूर्वोक्तं दंडमर्हति । सस्यग्रहणं क्षेत्रोपचयोपलक्षणार्थं यस्मिन्क्षेत्रे यावत्यन्नाल धान्यादिकं गवादिभिर्नि
॥२२९॥ शितं तावत्क्षेत्र फलमेतावति क्षेत्रे एतावद्भवतीति सामंतैः परिकल्पितं तत्क्षेत्रस्वामिने गोमी दापनीयः गोप १
स्तु ताडनीय एव न फलं दापनीयः गोपस्य ताडनं पूर्वोक्तदंडसहितमेव पालदोषेण सस्यनाशे तु दण्ड्यं प
न त्वपाल दोषेण गौस्तु सस्यानि नाशयेत् । न तत्र गोमिनो दंडः पालः स दंडमर्हतीति वचनात् गोमात्पुनः स्वा
पराधेन सस्यनाशे पूर्वोक्तं दंडमेवार्हति न ताडनं फलदानं पुनः सर्वत्र गोमिन एव तत्फलं पुरुषमहिष्या

दिलीरोपणेगचारेण तत्क्षेत्रफलं गोगित्वात्तगवादिभक्षितावशिष्टं पलालादिकं गोस्मिनैव ग्रहीतव्यं मध्य
स्थकल्पितमूल्यदानेन क्रीतप्रायत्वात्। अत एव नारदः। गोभिस्तु भक्षितं धान्यं यो नरः प्रतिपादयेत्। सामंतानु
मतं देयं धान्यं यत्तत्रवापितं पलालं गोमिने देयं धान्यं वै कर्षकस्य त्विति। क्षेत्रविशेषे त्वपवादमाह पथिग्रा
मविपीनांते क्षेत्रे दोषो न विद्यते। अकामतः कामचारे चोरदंडमर्हति। पथि ग्रामविपीनांते ग्रामविपि
नसमीपवर्त्तिक्षेत्रे अकामतो गोभिर्भक्षिते गोमिनो द्वयोरप्यदोषः दोषाभावप्रतिपादनं च दंडाभावा
र्थं विनष्टसस्यमूल्यदानप्रतिषेधार्थं च। कामचारे कामतश्चारणे चोरवच्चोरस्य यादृशो दंडस्तादृशं दंडमर्ह
ति। एतच्चानावृतक्षेत्रविषयं। यथापरिवृतं धान्यं विहिंस्युः पशवो यदि। न तत्र प्रणयेद्दंडं नृपतिः पशुरक्षि
णामिति दंडाभावस्यानावृतक्षेत्रविषयं ज्ञापरि त्वेन मनुनोक्तत्वात्। आवृते पुनर्मार्गादिक्षेत्रे दोष
इत्यवधारणं वृत्तिकरणं च तेनैवोक्तं वृत्तिं च तत्र कुर्वीत यामुष्ट्रो नावलोकयेत्। छिद्रं व्यावारयेत्सर्वं श्वसूकरमुख
नुगमिति पशुविशेषेपि दंडाभावमाह। महोक्षोत्सृष्टपशवः सूतिकागंतुकादयः। पालो येषां च ते मोच्या

दैवराजपरिप्लुताः महाभ्यासावुक्ताचेति महोक्षो वृषः सेक्ता। उत्सृष्टाः पशवो [illegible]मोत्सर्गादिविधाने।
न दैवतोद्देशेन त्यक्ताः। सूतिका प्रसूतिका आ निर्दशाहात्। आगन्तुकः स्वयूथात्परिभ्रष्टो देशान्तरागतः। एते भ
120 व्यापरसस्य नाशेऽपि न दंड्याः। पशुपालो विद्यते तोऽपि दैवराजपरिप्लुताः दैवराजहताः सस्यनाश
कारिणो न दंड्या। आज्ञा दिव्यहाणक्षुस्पाध्या दपाग्घंतते चाशनसोक्तः। अदंड्या हास्तिनो हयभ्याः प्रजापाल
हिते स्मृतः। अदंड्यो वा काणकूटो च पशुभ्यस्तृतल्लक्षणाः। अदंडवागंतुको गौश्च सूतिकावाभिसारिणी। अदंड्यो
||१२०|| श्चोत्सवे गावः श्राद्धकाले तथैव चेति। अतैत्तस्य पशूनामस्वामित्वे तेन दंड्यत्वासंभवात्तार्यामुपादा
नं यथोत्सृष्टाः पशवो न दंड्या एवं महास्यादय इति। गोस्वामिन उक्ते इदानीं गोपं प्रत्यपदिश्यते। यथा पिताय
भूनोपः सायं प्रत्यर्पयेत्तथा। प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः। गोस्वामिना प्रातःकाले पथ्यागणपित्वा सम
र्पिताः पशवस्तस्यैव सायंकाले गोपो गोस्वामिने पशून्विगणय्य प्रत्यर्पयेत्। प्रमादेन स्वापराधेन [illegible]
मृतान्नष्टांश्च पशून् कृतवेतनः प्रकल्पितवेतनो गोपः स्वामिने दापनीयः। चेतनकल्पना च नारदेनोक्ता। गव

शताद्वत्सराद्धेनुः स्याद्द्विशताद्भृतिः। प्रतिसंवत्सरं गोसंदोहं स्वाम्यमेहनीति। प्रमादनाशस्य मनुनाप्युक्त
तः नष्टं विनष्टं कृमिभिः श्वहतं वा विषमे मृतं। हीनं पुरुषकारेण प्रदद्यात्पाल एव तु। इति। प्रसह्य चौरैरपहृतं न
दातव्यः। यथाह मनुः विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति। यदि देशे च काले च स्वामिनः स्वस्य शंसति।
ति। दैवमृतानां पुनः कर्णादिप्रदर्शनीयं। कर्णौ चर्म च वालांश्च वस्तिस्नायूनि रोचनां। पशुषु स्वामिषु दद्या
न्मृतेष्वङ्गानि प्रदर्शयेदिति मनुस्मरणात्। किंच पालदोषविनाशे तु पाले दंडो विधीयते। अर्द्धत्रयोदश
पणः स्वामिने द्रव्यमेव वा पालदोषात्पशुविनाशे अर्धाधिकत्रयोदशपणान् दंडं पालो दाप्यः स्वामिनश्च
विनष्टपशुमूल्यं। दंडपरिमाणार्थमिदं श्लोकः अनन्तरपूर्वोक्तमेव। गोप्रसंगाद्गोप्रचारमाह ग्रामेच्छया गोप्र
चारो भूमिराजवशेन वा। द्विजस्तृणैधःपुष्पाणि सर्वतः स्ववदाहरेत्। ग्रामेच्छया ग्रामीणजनेच्छया भूस्वल्प
त्वमहत्वापेक्षया राजेच्छया वा गोप्रचारः कर्तव्यः गवादीनां चरणार्थं कियानपि भूभागोऽकृष्टपरिकल्पनी
य इत्यर्थः। द्विजस्तृणैधःपुष्पाणि गवाग्निदेवतार्थं तृणकाष्ठकुसुमानि सर्वत्र स्ववदनिवारं तस्याहरेत्। फलानि

परिवृता देवागोग्रास्यर्थे रग्णमे धान्यवी ह्वनस्पतीनी पुष्पाणिस्वच्छदाददीतफलानि चापरिवृतानामिति गौ
रि तमस्मरणात् एतच्चापरिगृहीतविषयं अपरिगृहीते द्विजव्यतिरिक्तानामप्यपरिग्रहो देवस्वेत्वसिद्धः यथा
१२ तेनैवोक्तं स्वामरि स्वचपसंविन्नागपरिग्रहा छिगभेघेति। यत्पुनरुक्तं चणांवापदिवाकाष्ठं पुष्पं वाय दिवा
फलं। अनापृछन् हिंग्रहो नाहस्तच्छेदनमर्हतीतिति तद्विजव्यतिरिक्तविषयं गवादिव्यतिरिक्तविषयमक
पद्विषयं वा॥ इदमपरं गवादीनां स्थानासनकार्यार्थमुच्यते। धनुःशतपरीणाहो ग्रामक्षेत्रांतरं भवेद्द्विश
१२२॥ ते खर्वटस्य स्यान्नगरस्तु चतुर्गुणं। ग्रामक्षेत्रयोरंतरं धनुःशतपरिमितं परिणाहः सर्वतो दिक्षु मनुष्यस
स्य कार्यं खर्वटस्य प्रचुरकंटकसंतानस्य द्विशतपरिणाहः नगरस्य बहुजनसंकीर्णस्य धनुषां चतुःश
तिपरिमितमंतरं कार्यं। इति स्वामिपालविवादप्रकरणं। संप्रत्यस्वामिविक्रयाख्यं व्यवहारपदमुपक्र
मते तस्य च लक्षणं नारदेनोक्तं। निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वापहृत्य वा॥ विक्रीयतेऽसमक्षं यत्स ज्ञेयोऽस्वा
मिविक्रयः इति तत्र चकिमित्याह स्वं लभेतान्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते। हीनाद्रहो हीनमूल्ये वेला

हीनेव तस्करः स्वमात्मसंबंधि द्रव्यमन्यविक्रीतं अस्वामिविक्रीतं परिपश्यति तदा तत्स्वामी तेन गृह्णीयात्। अ-
स्वामिविक्रयस्य स्वत्वहेतुत्वाभावात् विक्रीतं गृहीत्वा दद्यादिति पोरुपलस्मरणार्थं। अस्वामिक्रेतुर्हीनतुल्यत-
रत्र अत एवाहं अस्वामिविक्रयं दानमाधिं च विनिवर्तयेदिति। क्रेतुः पुनरप्रकाशिते गोपिते क्रये दोषो भव-
ति तथाहहीनाद्रहो द्रव्यागमो पापहीनात्। रहसि चैकांते सन्नाद् द्रव्यादपि हीनमूल्यात्। अल्पतरेण मूल्येन च क्रये वेल-
याहीनो वेलाहीनः पौराज्यादौ कृत। तत्र च क्रेता तस्करो भवति तस्करेष दंडादिनाप संभवतीत्यर्थः। यथा क्रीतं द्रव्यम-
स्वामिविक्रीतं प्राप्य स्वामी तदाप्नुयात्। प्रकाशे क्रये शुद्धिः स्यात् क्रेतुः स्तेयपरिहः क्रयादिति। स्वाम्यं त्विपुत्रकेन वे-
त्राविं कर्तव्यमित्यत माह। नष्टापहृतमासाद्य हर्तारं ग्राहयेन्नरं। देशकालातिपत्तौ च गृहीत्वा स्वयमर्पयेत्।
नष्टापहृतं वा द्रव्यमन्यदापं क्रयादिना प्राप्य हर्तारं विक्रेतारं नरं ग्राहयेत्। चौरोद्धरणिकादिभिः। आत्मशु-
द्ध्यर्थं राजदंडाप्राप्त्यर्थं च। अथ यदि विदितदेशांतरगतः कालांतरे वा विपन्नस्तदा मूल्याहरणाशक्तौ विक्रेतारम-
दर्शयित्वैव स्वयमेव तद्धनं नाष्टिकस्य समर्पयेत्। तावतैवासौ शुद्धो भवतीति। अथ धरावापीर्वाख्यातं तदि-

दमनुपपन्नं विक्रेतुर्दर्शनाच्छुद्धिरित्यनेन पौनरुक्त्यप्रसंगात्। अतोऽन्यथा व्याख्यायते। नष्टापहृतमिति
नाष्टिकं प्रत्ययमुपदेशः नष्टमपहृतं वात्मीयं द्रव्यमासाद्य क्रेतुर्हस्तस्थं ज्ञात्वा तं हर्तारं क्रेतारं स्थलपालादि
भिर्ग्राहयेत्। देशकालातिपत्तौ देशकालाद्यतिक्रमे स्थलपालाद्यसन्निधानेन तद्विज्ञायन कालात्प्राक्
पलायनाशंकायां स्वयमेव गृहीत्वा नेच्यः समर्पयेत्। गृहीते हर्तरि किं कर्तव्यमित्यत आह। विक्रेतुर्दर्शना
च्छुद्धिः स्वामी द्रव्यं नृपो दमं। क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी। पद्यसौ गृहीतः क्रेता नमपदम
पहृते अन्यस्य सकाशात्क्रीतमिति विक्रीतदा तस्य क्रेतुर्विक्रेतुर्दर्शनमात्रेण शुद्धिर्भवति न पुनरसावभियो
॥२२२॥ ज्यः किंतु तत्सुदर्शितेन विक्रेत्रा सह नाष्टिकस्य विवादः। यथाह बृहस्पतिः। मूले समाहृते क्रेता नाभि
योज्यः कथंचन। मूलेन सह वादस्तु नाष्टिकस्य विधीयत इति। तस्मिन्विवादे पद्यसौ स्वामिविक्रयनिश्चयो भ
वति तदा तस्य नष्टापहृतस्य गवादिद्रव्यस्य विक्रेता तस्मात्सकाशात्स्वामी नाष्टिकः स्वीयं द्रव्यमवाप्नोति
नृपश्चापराधानुरूपं दंडं क्रेता च मूल्यमवाप्नोति अथ यासौ देशांतरं गतस्तदा योऽजनसंख्यायाः आनप

दे नार्यकालोऽयः प्रकाशं वा क्रयं कुर्यान्मूल्यं वापि समर्पयेत्। मूल्यानर्घकालस्य देयास्तत्र च संख्ययेति गौतमस्मरणात्। अस्व
विज्ञात देशतया मूल्यमाहर्तुं न शक्नोतीति तदा क्रयं शोधयित्वैव मुक्तो भवति। असमाहार्यमूल्यस्तु क्रयमेव विशोधयेदिति
वचनात्। स्पदापुनः साक्ष्यादिनिर्दिष्टेन वाक्रयं न शोधयति मूल्यं च न प्रदर्शयति तदा स एव दंडादिभाग् भवति। अनुप
स्थापयन्मूल्यं क्रयं वाप्य विशोधयन्। यथाभियोगं धनिने धनं दाप्यो दमं च सः इति स्मरणात्। स्वल्पेनैतान्यपि विक्री
तामित्फलं तल्लिप्सुना किं कर्तव्यमित्यत आह॥ आगमोऽनोपभोगेन नष्टं भाव्यमतोऽन्यथा पंचबंध्यो दमस्तस्य राज्ञे ते
नाविभाविते। आगमेन तरिसु क्रयादिना अयं भोगेन च मदीयमिदं द्रव्यं तेनैव नष्टमपहृतं॥ ॥ गोव्यदगुरुभ्यो नमः॥
चेति भाव्यं साधनीयं तत्स्वामिना अतोऽन्यथा नेन स्वामिना अविभाविते पंचबंधो नष्टद्रव्यपंचमांशो नाष्टकेन राज्ञे देयः अत्र
चापं क्रमेः पूर्वस्वामानष्टमात्मीयं साधयेत् ततः क्रेता चौर्यपरिहार्यं मूल्यं लाभाय च विक्रेतारमानयेत्। अथान्यस्तु न शक्नोति
तदात्मदोषपरिहाराय क्रयं साधयित्वा द्रव्यं नाष्टिकस्य समर्पयेदिति। तस्करपृच्छादकं प्रत्याह। हृतं प्रनष्टं यो द्रव्यं पर
हस्तादवाप्नुयात्। अनिवेद्य नृपे दंड्यः स तु षण्णवतिं पणान्। हृतं प्रनष्टं वा चौरादिहृतं स्वं द्रव्यमनेन मदीयं द्रव्यमपहृत
मिति नृपायानिवेद्यैव दर्पादिना परगृहात् गृह्णाति स षण्णवतिपणं दंडनीयः तस्करपृच्छादकत्वेन दुष्टत्वात्। अपुरु

वानीतंप्रत्याहृ।शौल्किकैःस्थानपालैर्नष्टापहृतमाहृतं।अर्वाक्संवत्सरात्स्वामी हरेतपरतोनृपः।पदानुमुल्कधिका।रन्निः
स्थानपालादिभिर्वानष्टमहृतंद्रव्यंराजपार्श्वप्रत्यानीतंतत्संवत्सरादर्वाक्प्राप्तश्चेत्स्वामिकःस्वंद्रव्यमवाप्नुयात्।ऊर्ध्वं
१२३ पुनःसंवत्सराद्राजागृह्णीयात्।स्वपुरुषानीतंचद्रव्यंजनसमूहेनृपआघोष्यपालयेत्संवत्सरंराज्ञारक्ष्याणिपि।यथाहगौतमः।
प्रनष्टस्वामिकमधिगम्यराज्ञेप्रब्रूयुर्विख्याप्यसंवत्सरंराज्ञारक्ष्यमितिपश्चात्पुनर्मनुनाऽवध्यांतरमुक्तं।प्रनष्टस्वामिकंद्रव्यं
राजात्र्यब्दंनिधापयेत्।अर्वाक्त्र्यब्दाद्धरेत्स्वामीपरतोनृपतिर्हरेदिति।तत्रभुक्तत्वनसंपन्नरक्षणविषयंरक्षणनिमित्तंषड
॥१२३॥ भागादिग्रहणंतेनैवोक्तं।आददीताथषड्भागंप्रनष्टाधिगतान्नृपः।दशमंद्वादशंवापिसतांधर्ममनुस्मरन्निति।तत्पद्वितीयपक्षे
थमसंवत्सरेषुयथाक्रमंषड्दादशोनावावेदितव्याः।पुर्यंचितं।चैतत्पुरस्तात्।मनुक्तषड्भागादिग्रहणास्यद्रव्यविशेषेऽपवादम्
हापणनेकशफेदद्यात्।चतुरःपंचमानुषेमहिषोष्ट्रगवांद्वौद्वौपादंपादमजाविके।एकशफेस्याद्विपुनष्टाधिगतेतत्स्वामीरा
ज्ञेरक्षणनिमित्तंचतुःपणंदद्यात्।मानुषेमनुष्यजातीयेद्रव्येपंचपणान्।महिषोष्ट्रगवांरक्षणनिमित्तंप्रत्येकंद्वौद्वौप
णौ।अजाविकेपुनःपादंदद्यादितिसर्वत्रानुषज्यते।अजाविकमितिसमानिर्देशोपिपादमितिवासावलात्प्रत्येकंसंबंधोऽव
गम्यते।इत्यस्वामिविक्रयप्रकरणं॥अथधनाविहिताविहतमार्गद्वयास्यपतपतत्रानपकर्मदत्ताप्रदानिकमभित्रिचलध्वानिघ

नद्यं दानाख्यं व्यवहारपदमाभिधीयते तत्स्वरूपं च नारदेनोक्तं दत्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति। दत्ताप्रदानिकं
नाम व्यवहारपदं हि तदिति। असम्यक् अविहितमार्गाश्रयणेन द्रव्यं दत्वा पुनरादातुमिच्छति यस्मिंस्तु विवादपदे तद्दत्ते
ने प्रदानिकं दत्तस्याप्रदानिकं पुनर्हरणं यस्मिन्दानाख्यमिति दत्ताप्रदानिकं नाम व्यवहारपदं विहितमार्गाश्रयत्वेन तत्प्रतिप
पत्ते च तु तत्तद्व्यवहारपदं दत्तानपाकर्मेत्यपर्यायद्वयेन भवति। दत्तस्यानपकर्म अपुनःरादानं यत्र दानाख्यविवादपदे तद्दत्ता
नपकर्म तच्छेदपादपादि वै देन चतुर्विधा। यथाह नारदः। अथ देयमदेयं च दत्तं चादत्तमेव च। व्यवहारेषु विज्ञेयो दानमा
र्गश्चतुर्विध इति तत्र देयमित्यनिषिद्धं दानक्रियायोग्यमुच्यते। अदेयमस्य तत्र तया निषिद्धं तया वादानानर्हं यत्पुनः प्रत्ताति
छेदनेन रमव्यावर्त्तनीयं तद्दत्तमुच्यते। अदत्तं तु यत्पुनराहरणीयं तत् कल्प्यते। तदेतत्सक्षेपेतो निरूपयितुमाह॥ स्वं कुटुंबा
विरोधेन देयं दारसुतादृते। नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतं। स्वामात्मीयं कुटुंबाविरोधेन कुटुंबभरणावशिष्ट
मितायावृत्तं दद्यात तद्दारसुतावन्यकत्वात। तथा च मनुः वृद्धौ च मातापितरौ साध्वी भार्या शिशुः सुतः। अप्यकार्यशतं
कृत्वा भर्तव्या मनुरब्रवीदिति कुटुंबाविरोधेनेत्यनेन देयमेकविधं दर्शयति स्वं दद्यादित्यनेनास्वभूतानामन्वाहितयाचि
तकाधिसाधारणनिक्षेपाणामपि चानामप्यदेयत्वं व्यतिरेकतो दर्शितं। यत्पुनर्नारदेनादेयानामष्टविधत्वमुक्तं अन्वाहि
तयाचितकमाधिसाध्यायं च यत निक्षेपः पुत्रदाराश्च सर्वस्वं चान्वये सति। आपत्स्वपि हि कष्टासु वर्त्तमानेन देहिना। अदेय

न्याहराचार्यायच्चान्यस्मै प्रतिश्रुतमिति । तद्देयत्वमात्राभिप्रायेण न पुनः स्वत्वजावाभिप्रायेण पुत्रदारसर्व
स्वप्रतिश्रुतेषु स्वत्वसद्भावात् । अन्वाहितादीनां च स्वरूपं प्रागेव दर्शितं । स्वं दद्यादित्यनेन दारसुतादेरपि स्वत्वावि
शेषेण देयत्वप्रसंगे प्रतिषेधमाह ॥ दारात्सुतादृते । दारसुतव्यतिरिक्तं स्वं दद्यात् न दारसुतमित्यर्थः । तथा पुत्रपौत्राद्य
१२५ न्वये विद्यमाने सर्वस्वं धनं न दद्यात् । पुत्रानुत्पाद्य संस्कृत्य वृत्तिं चैषां प्रकल्पयेदिति स्मरणात् । तथा हिरण्यादि
कमन्यस्मै प्रतिश्रुतमन्यस्मै न देयं । एवं दारसुतादिव्यतिरिक्तं देयमुक्त्वा प्रसंगाद्देयधनग्रहणे च प्रतिग्रहस्याप्र १२५
काशमेव कर्तव्यमित्याह । प्रतिग्रहः प्रकाशः स्यात् स्थावरस्य विशेषतः । देयं प्रतिश्रुतं चैव दत्वा नापहरेत्पुनः । प्रति
१२५ ग्रहणं प्रतिग्रहः सः प्रकाशः प्रकटः कर्तव्यः विवादनिराकरणार्थं स्थावरस्य विशेषतः प्रकाशमेव ग्रहणं कर्तव्यं त
स्य स्ववर्णादिवदात्मनिस्थितस्य दर्शयितुमशक्यत्वात् । प्रासंगिकमुक्त्वा प्रकृतिमनुसरन्नाह । देयं प्रतिश्रुतं
चैव । यद्यस्मै धर्मार्थं प्रतिश्रुतं तत्तस्मै देयमेवाय यस्मै धर्मेत्यप्रमुच्यते तान नवति प्रच्युते पुनर्न दातव्यं । प्रतिश्रु
त्याप्यधर्मसंयुक्ताय न दद्यादिति गौतमस्मरणात् । दत्वा नापहरेत्पुनः न्यायमार्गेण यद्दत्तं तत्सप्तविधमपि पुन
र्नापहर्तव्यं । किंतु तथैवानुमंतव्यं । यत्पुनरन्यायेन दत्तं तद्दत्तं षोडशप्रकारमपि प्रत्याहर्तव्यमेव तत्पर्या दत्तं भ
वति । नारदेन च दत्तं सप्तविधं प्रोक्तं अदत्तं षोडशात्मकमिति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृत्तं । पण्यमूल्य

त्युतिस्तुष्ट्या स्नेहात्प्रत्युपकारतः स्त्रीशुल्कानुग्रहार्थं च दत्तं दानविदो विदुः। अदत्तं तु भयक्रोधशोकवेगरु
जान्वितैः तथोत्कोचपरीहासव्यत्यासछलयोगतः बालमूढास्वतंत्रार्तमत्तोन्मत्तापवर्जितं। कर्त्तामेमेदं कर्मेति
प्रतिलाभेच्छया च यत्। अपात्रे पात्रमित्युक्ते कार्ये चाधर्मसंहिते। यद्दत्तं स्यादविज्ञानाद् अदत्तमिति तत्स्मृतमिति
अयमर्थः पण्यस्य क्रीतद्रव्यस्य यन्मूल्यं दत्तं। भृतिर्वेतनं। कृतकर्मतो दत्तं। तुष्ट्या वंदिचारणादिभ्यो दत्तं। स्नेहाद्दुहि
तृपुत्रादिभ्यो दत्तं। प्रत्युपकारतः उपकृतवते प्रत्युपकारस्तत्प्रयोगाद्दत्तं। स्त्रीशुल्कं परिणयनार्थं कन्याज्ञातिभ्यो दत्तं पश्चाद्द
ग्रहार्थं दत्तं तदेतत्सप्तविधमपि दत्तमेव न प्रत्याहरणीयं। भयेन च दिग्रहारिभ्योपदत्तं क्रोधेन पुत्रादिवैरिनिर्यातनाया
न्यस्मै दत्तं। पुत्रवियोगादिनिमित्तशोकावेशेन दत्तं। उत्कोचेन कार्यप्रतिबंधनिरासार्थमधिकृतेभ्यो। यद्दत्तं परिहासे
नोपहासेन दत्तं एकोपि स्वं द्रव्यमन्यस्मै ददाति अन्योपि तस्मै ददाति दानव्यत्यासः छलयोगतः शतदानमभिधाय प
सहस्रमितिः परिभाष्य ददाति। बालेनाप्राप्तषोडशवर्षेण मूढेन लोकवेदानभिज्ञेन। अस्वतंत्रेण पुत्रदासादिना
आर्तेन रोगाभिभूतेन। मत्तेन मदनीयमत्तेन उन्मत्तेन वातकफोन्मादग्रस्तेन वा अपवर्जितं दत्तं। तथायं मदीय
मिदं कर्म करिष्यतीति प्रतिलाभेच्छया दत्तं अचतुर्वेदाय चतुर्वेदोहमित्युक्तवते दत्तं। यज्ञं करिष्यामीति धनं लब्ध्वा
द्यूतादौ विनियुंजानाय दत्तमित्येवंविधमष्टप्रकारमपि दत्तमदत्तमित्युच्यते प्रतिहरणीयत्वात्। आर्त्तेदत्तस्याप

तत्वं धर्मकार्यव्यतिरिक्तविषयं। स्वच्छन्दोत्रेन वा दत्तं श्रावितं धर्मकारणात्। अदत्वा तु मृते दाप्यस्तत्सुतो न
125 संशयः इति कात्यायनस्मरणात्। तदेतदपरं संक्षिप्तार्थं वचनं सर्वविवादसाधारणं। योगाधमनविक्रीतं
योगदानप्रतिग्रहं। यस्य वाप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेदिति। योगानुपाधिः येनागाधमिनोपाधिविशेषा
धिविशिष्टोपदानप्रतिग्रहाः। क्रीतास्तदुपाधिगमे कृपादीन्वि निवर्तयेदित्यर्थः। पुनः षोडशप्रकारमन्यदत्तं गम्य
ति पश्चादेयं पृच्छतीति तयोर्दण्डो नारदेनोक्तो। गृह्णात्यदत्तं यो लोभाद्यश्चादेयं प्रयच्छति। अदेयदायको दण्ड्यस्तथादत्तप्रत
च्छक इति। इति दत्ताप्रदानिकं नाम प्रकरणं॥ अथ क्रीतानुशयः कथ्यते तत्र स्वरूपं च नारदेनोक्तं। क्रीत्वा मूल्येन यः पण्यं
१२५॥ क्रेता न बहु मन्यते। क्रीत्वानुशय इत्येतद्विवादपदमुच्यत इति तत्र च यस्मिन्नहनि पण्यं क्रीतं तस्मिन्नेवाहनि तद्विक्रे
तं प्रत्यर्पणीयमिति तेनैवोक्तं। क्रीत्वा मूल्येन यः पण्यं दुष्क्रीतं मन्यते क्रयी। विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवान्ह्यविक्ष
तमिति द्वितीयादिदिनेनु प्रत्यर्पणे विशेषस्तेनैवोक्तः। द्वितीयेऽह्नि ददत्क्रेता मूल्यात्त्र्यंशांशमावहेत्। द्विगुणं त
तृतीयेऽह्नि परतः क्रेतुरेव तदिति परतोऽनुशयानकर्तव्य इत्यर्थः। एतच्च बीजव्यतिरिक्तोपभोगविनश्वरवस्तु
विषयं बीजादिक्रये पुनरन्येरव प्रत्यर्पणावधिरित्याह। दशैकपंचसप्ताहमासत्र्यहार्धमासिकं। बीजायोव

स्वरत्नस्त्रीदोह्यपुंसांपरीक्षणं।वीजंव्रीह्यादिवीवीजं।अयोलोहः।वाह्योवलीवर्दादिः।रत्नंमुक्तापुवालादि
स्त्रीदासी।दोह्यंमहिष्यादि।पुमान्दासएषांवीजादीनां।यथाक्रमेणदशाहादिः।परीक्षाकालोविज्ञेय
परीक्षमाणेचवीजादौयद्यसम्यक्त्वबुध्यात्मनुशयो।भवतितदादशाहाद्यन्ततएवक्रयनिवृत्तिःनपुनःक्र
र्ध्वंनित्यरूपदशाहपुयोजनं।पण्यमनवचनं।क्रीत्वाविक्रीयवाकिंचिद्यस्येहानुशयो।भवेत्सोदशाहात्तद्द्रव्यं
दद्याच्चैवाददीतचेतितदुक्तं।लोहादिव्यतिरिक्तोपभोगविनश्वरगृहक्षेत्रपानशयनादिविषयं।सर्वंचै
तदपरीक्ष्यक्रीतविषयं।यत्पुनःपरीक्ष्यनपुनःप्रत्यर्पणीयमितिसमयंकृत्वाक्रीतंतद्विक्रेत्रेनप्रत्यर्पणी
यंतदुक्तं।क्रीतापण्यंपरीक्ष्येतप्राक्स्वयंगुणदोषतः।परीक्ष्याभिमितंक्रीतंविक्रेतुर्नभवेत्पुनरिति।दोह्या
दिपरीक्षणप्रसंगेनस्वर्णादेरपिपरीक्षणमाह।।अग्नौसुवर्णमक्षीणंरजतेद्विपलंशते।अष्टौत्रपुप
सीसेचताम्रेपंचदशायसि।वन्हौप्रताप्यमानंसुवर्णंनक्षीयते।अतःकटकादिनिर्माणार्थंयावत्सुवर्णंसुवर्णकार
हस्तेप्रक्षिप्तंतावत्तुलितंतैःप्रत्यर्पणीयं।इतरस्याक्षयंदाप्यःदं[illegible]रजतेतुशतपलंप्रताप्यमानंपल

द्विपलं क्षीयते अष्टौ। त्रपुणि सीसे च शत इत्यनुवर्त्तते। त्रपुणि सीसे च शतपले प्रताप्यमाने अष्टौ पलानि क्षी-
यंते। ताम्रे पंच दशायसि। ताम्रे शतपले पंच पलानि। आयसे दशपलानि क्षीयंते। आयसि शत इत्येव। कांस्ये
तु त्रपुताम्रयोनित्वात्तदनुसारेण क्षयः कल्प्यः। इतोऽधिकक्षयकारिणः शिल्पिनो दंड्याः। क्वचित्कंबलादौ॥
वृद्धिमाह शते दशपला वृद्धिरौर्णे कार्पाससौत्रिके। मध्ये पंचपला वृद्धिः ससूक्ष्मे त्रिपला मता॥ स्थूले-
नौर्णसूत्रेण कंबलादिकं क्रियते। तस्मिन्शतपले दशपला वृद्धिर्वेदितव्या। एवं कार्पाससूत्रनिर्मितप-
टादौ वेदितव्या। मध्ये अनतिसूक्ष्मसूत्रनिर्मिते पटादौ पंचपला वृद्धिः। सुसूक्ष्मसूत्रनिर्मिते पटादौ त्रिप-
१२६॥ ला वृद्धिर्वेदितव्या। एतच्चाप्रक्षालितवासोविषयं द्रष्टव्यं। तत्र विशेषमाह। कार्मिके रोमबद्धे च त्रिंशद्भागः
क्षयो मतः। न क्षयो न च वृद्धिश्च कौशेये वल्कलेषु च॥ कार्मिकं कर्मणा चित्रेण निर्मितं पत्रनिष्पन्ने पट-
रुचकस्वस्तिकादिकं चित्रसूत्रैः क्रियते तत्कार्मिकमित्युच्यते। पत्रप्रावरणादेः रोमाणि बध्यंते स रोमबद्धः॥
तत्र त्रिंशत्तमो भागः क्षयो वेदितव्यः। कौशेये कोशप्रभवे वल्कलेषु वल्कलनिर्मितेषु वृद्धिह्रासौ न स्तः।

किंतु पावद्धानार्थं कुचिंदादिभ्यो दत्तं तावदेव प्रत्यादेयं। द्रव्याणां मानं त्वप्रति द्रव्यं दयवृद्धिप्रतिपादनार्थं तु । साम
नेन ह्रासवृद्धिज्ञानोपायमाह॥ देशं कालं च भोगं च ज्ञात्वा नष्टे बलाबले द्रव्याणां कुशला ब्रूयुर्यत्तद्दाप्यमसंशयं।
द्याणां सौमादी द्रव्येण नष्टे ह्रासमुपगते द्रव्याणां कुशलाः द्रव्यवृद्धिह्रासपरिज्ञाः देशकालमुपभोगं तथा नष्टद्रव्यस
बलाबलं सारासारतां च परीक्ष्य प्रत्यर्पितकल्प्यं तत्तद्दाप्यः स्वं शिल्पिनो द्रव्या। इति क्रीतानुशयप्रकरणं। सांप्रतमभ्यु
पेत्याऽशुश्रूषाख्यमपरं विवादपदमभिधातुमुपक्रमते तत्स्वरूपं च नारदेनोक्तं। अभ्युपेत्य तु शुश्रूषां यस्तां न प्रतिप
द्यते। अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यत इति। आज्ञाकरणं शुश्रूषा। तामंगीकृत्य पश्चाद्यो न संपादयति तद्विवाद
पदमभ्युपेत्याशुश्रूषाकस्य पंचप्रकाराः शि अंतेवासि (भृ)तकाधिकर्मकृतदास इति तेषामाद्याश्चत्वार
कर्मकरा इत्युच्यते ते च शुभकर्मकारिणः दासाः पुनर्गृहजातादयः पंचदशप्रकाराः गृहद्वाराशुचिस्थानर
थ्यावस्करशोधनाद्यशुभकर्मकारिणः तदिदं नारदेन स्पष्टीकृतं। शुश्रूषकः पंचविधः शास्त्रे दृष्टो मनीषि
ष्यांते भिः चतुर्विधः कर्मकरस्तेषां दासास्त्रिपंचकाः। शिवासि भृतकाश्चतुर्थस्त्वधिकर्मकृत्। एते कर्मकरा ज्ञेया दा
सास्तु गृहजातादयः। सामान्यमस्वतंत्रत्वमेषामाहुर्मनीषिणः। जातिकर्मकृतस्तूक्तो विशेषो वृत्तिरेव च। कर्म

१२७

२२७॥

पिद्धि विध्यं ज्ञेयमशुभं शुभमेव च। अशुभं दासकर्मोक्तं शुभं कर्मकृतां स्मृतं। गृहद्वाराशुचिस्थानरथ्यावस्कर
शोधनं। गुह्यांगस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनं। इष्टतः स्वामिनश्चांगुपस्थानमथांततः। अशुभं कर्म विज्ञे
यं शुभमन्यदतः परं॥ इति। तत्र शिष्यो वेदविद्यार्थी। अंतेवासी शिल्पविद्यार्थी। भृतस्तु वेतनेन कर्मक
रोति स भृतकः कर्म कुर्वतामधिष्ठाता अधिकर्मकृत्। अशुचिस्थानं विण्मूत्रादिप्रक्षेपार्थं गर्तादिकं। अवस्क
रः गृहमार्जन्याः स्थानं दिनचपस्थानं उज्झनं त्यागः भृतकश्चात्र त्रिविधस्तदुक्तं। उत्तमस्त्वायुधीयोत्र मध्य
मस्तु कृषीवलः। अधमो भारवाही स्यादित्येवं त्रिविधो भृतक इति। दास्याः पुनः गृहजातस्तथा क्रीतो लब्धो दाया
दुपागतः। अनाकालभृतस्तद्वदाहितः स्वामिना च यः। मोक्षितो महतश्चर्णात् युद्धप्राप्तः पणे जितः। तवाहमित्युप
गतः प्रव्रज्यावसितः कृतः। भक्तदासश्च विज्ञेयस्तथैव वडवाभृतः। विक्रेता चात्मनः शास्त्रे दासाः पंचदश स्मृताः॥ गृह
दास्यां जातो गृहजातः क्रीतो मूल्येन। लब्धः प्रतिग्रहादिना। दायादुपागतः पित्रादिदासः। अनाकालभृतो दुर्भिक्षे यः
दासत्वाय मरणाद्रक्षितः आहितः स्वामिना धनग्रहणेन दासतां नीतः। ऋणमोचनेन दासत्वमभ्युपगत ऋणदासः
युद्धप्राप्तः समरे विजित्य गृहीतः। पणे जितः यद्यस्मिन्विवादे पराजितोऽहं त्वद्दासो

सोऽन्नदामीति परिभाष्य पणे जितः तवाहं दास इति स्वयं प्रतिपन्नः। प्रव्रज्यावसितः प्रव्रज्यातश्च्युतः। कृतः एतावत्कालं त्वद्दासः इ
त्यभ्युपगमितः भक्तदासः सर्वकालं भक्तार्थमेव दासत्वमभ्युपगम्य प्रवृत्तः वडवाहृतः वडवा गृहदासी त
याहृतस्तल्लोभेन तामुद्वाह्य दासत्वेन प्रविष्टः। य आत्मानं विक्रीणीते स चात्मविक्रेता इत्येवं पञ्चदशप्रकारा अप
तु मनुना ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ। पैतृको दंडदासश्च सप्तैते दासयोनय इति सप्तविधत्वमुक्तं। तत्र
सों दासत्वप्रतिपादनार्थं न तु परिसंख्यार्थं तत्रैषां शिष्यान्तेवासि भृतकाधिकर्मकृद्दासो नाम द्वेष्यासि प्रवृत्ति
प्रागेव प्रतिपादिता आसूतग्राप्य धीपेतल्लब्धे चास्मै निवेदयेदित्यादिना। अधिकर्मकृत् भृतकानां तु वेत
तनादानप्रकरणे वक्ष्यते योपावत्कृते कर्म तावत्तस्य आत्तु वेतनमित्यादिना। दासान्तेवासिनोस्तु धर्मावि
शेषं वक्तुमाह॥ बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते। स्वामिप्राणप्रदो भक्तत्यागात्तन्निष्क्रयादपि। ब
लाद्बलात् बंधनेन यो दासीकृतः पश्चचौरैरपहृत्य विक्रीतः अपिशब्दादाहितोद्धृतश्च संमुच्यते। य
दि स्वामी न मुंचति तर्हि राज्ञा मोचयितव्यः। उक्तं च नारदेन। चौरापहृतविक्रीता ये च दासीकृता बलात्।

राज्ञा मोचयितव्यास्ते दास्यं ते तु हि नेष्यत इति। चौरव्याघ्राद्यवरुद्धस्य स्वामिनः प्राणान्यः प्रददाति रक्ष
त्यपावपि मोचनीयस्तदिदं सर्वदासानां साधारणं दास्यनिवृत्तिकारणं। यो वैषां स्वामिनं कश्चिन्मोक्षये
त्प्राणसंशयात्। दासत्वात्स विमुच्येत पुत्रभागं लभेत चेति नारदस्मरणात्। अत्र दासादीनां प्रातिस्विकम
पि मोक्षकारणमुच्यते अनाकालभृत इत्यत्र दासोऽन्नस्य त्यागाद्दासान्यावा रन्नस्य स्वामिद्रव्यं यावदुपभुक्तं तत
व दत्वा मुच्यते। आहितार्थदासोऽत्र तन्निष्क्रयाद्यज्ञहत्वा स्वामिनाहितोपद्यु दत्वा धनिनः ऽत्र मर्माण्मो
१२८॥ चितः तस्य निष्क्रयात् सवृद्धिकस्य प्रत्यर्पणान्मुच्यते। नारदेन विशेषोऽप्युक्तः अनाकालभृतो दास्यान्मुच्य
ते गोयुगं ददत् सन्निक्षिप्तं पदार्थं दत्वा न तन्नमुत्थेत कर्मणा। अत्रास्याक्षेपणात्स चोक्तो दासः प्रमुच्यते। १२
आहितोऽपि धनं दत्वा स्वामी यद्येनमुद्धरेत्। ऋणं तु सोदयं दत्वा ऋणाद्दास्यात्प्रमुच्यत इति। तथा तवाहमि
त्यपगत युद्धप्राप्तपणजितस्तेकवडवाहृतानां च प्रातिस्विकं मोचनकारणं तेनैवोक्तं। तवाहमित्यपगतो यु
द्धप्राप्तः पणे जितः प्रतिशीर्षप्रदानेन मुच्येरंस्तुल्यकर्मणा। कृतकालव्यपगमात्कृतकोऽपि विमुच्यते। निरु

दाद्वडवापास्तमुच्यते वडवाहृत इति। दासेनसह संभोगनिरोधादित्यर्थः। तदेवं गृहजस्तत्क्रीतलब्धदायप्राप्तानामवि
क्रोपिणां स्वामिप्राणप्रदानात्। तत्प्रसादनस्यपस्ता धारणकारणव्यतिरेकेण मोक्षो नास्ति विशेषकारणानभिधानात्
दासमोक्षस्थानेनेक्रमेण कर्तव्यः। स्वंदासमिच्छेद्यः कर्तुमदासं प्रीतमानसः। स्कंधादादाय तस्यासौ भिंद्यात्कुंभं
सहांभसा॥ साक्षताभिः सपुष्पाभिः मूर्द्धन्याद्भिरवाकिरेत्। अदास इति चोक्त्वा त्रिः प्राङ्मुखं तं समुत्सृजेदिति तेन
वाक्ये। प्रव्रज्यावसितस्य तु मोक्षो नास्तीत्याह। प्रव्रज्यावसितो राज्ञो दास आमरणान्तिकः। प्रव्रज्यासः पापः। ततो
वसितः प्रच्युतः अनन्यपगतप्रायश्चित्तश्चेद्राज्ञ एव दासो भवति। मरणमेव तद्दासत्वस्यान्तः। नान्तरा प्रतिमोक्षो
स्ति। वर्णानां दासव्यवस्थामाह॥ वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः। ब्राह्मणादीनां वर्णानामानुलो
म्येन दास्यं ब्राह्मणस्य क्षत्रियादयः क्षत्रियवैश्यशूद्रो वैश्यस्य शूद्र इत्येवमानुलोम्येन दासभावो भवति। न प्रति
लोम्येन स्वधर्मत्यागिनः पुनः परिव्राजकस्य प्रातिलोम्येनापि दासत्वमिष्यत एव। यथाह नारदः। वर्णानां प्र
तिलोम्येन दासत्वं न विधीयते। स्वधर्मत्यागिनोऽन्यत्र दारवद्दासता मतेति। अन्तेवासिधर्मानाह। कृतशिल्पोऽपि
न वसेत्कृतकालं गुरोर्गृहे। अन्तेवासी गुरुप्राप्तभोजनस्तत्फलप्रदः। अन्तेवासी गुरोर्गृहे कृतकालं वर्षचतुष्

यस्मायुर्वेदादिशिल्पशिक्षार्थं त्वगृहे चसामीति यावदंगीकृतं तावत्कालं वसेत् पश्चापि वर्षचतुष्टयादर्वागेव।
लब्धापेक्षितशिल्पविद्यः कर्यं निवसेत्। गुरुप्राप्तभोजनः गुरोः सकाशात्प्राप्तं भोजनं येन स तथोक्तः। तत्फलप्र
दः तस्य शिल्पस्य शिक्षितस्य फलमाचार्याय प्रदद्यात् इति तत्फलप्रदः एवंभूतो वसेत्। नारदेन विशेषोप्यत्र द
र्शितः स्वशिल्पमिच्छन्नाहर्तुं बान्धवानामनुज्ञया। आचार्यस्य वसेदंते कृत्वा कालं सुनिश्चितं। आचार्यः शिक्षये
देनं स्वगृहे दत्तभोजनं। न चान्यत्कारयेत्कर्म पुत्रवच्चैनमाचरेत्। शिक्षयंतमसंदुष्टं य आचार्यं परित्यजेत्। ब
१२९। लाद्वासयितव्यः स्याद्वधबंधौ च सोर्हति। शिक्षितोपि कृतं कालमंतेवासी समाप्नुयात्। तत्र कर्म च यत्कुर्या
दाचार्यस्यैव तत्फलं। गृहीतशिल्पः समये कृत्वाचार्यं प्रदक्षिणं। शिक्षितस्यानुमान्यैनमंतेवासी निवर्त्तत इ
ति बलशब्दोत्र ताडनार्थः दोषस्याल्पत्वात्। इत्यभ्युपेत्याशुश्रूषाख्यं विवादपदं प्रकरणं। संप्रति संविद्व्यतिक्र
मः कथ्यते तस्य च लक्षणं नारदेन व्यतिरेकमुखेन दर्शितं। पाषंडिनैगमादीनां स्थितिः समय उच्यते। सम
यस्यानपाकर्म तद्विवादपदं स्मृतमिति परिभाषितधर्मेणाव्यवस्थानं समयस्तस्यानपाकर्म अव्यतिक्रम

परिपालनं तद्व्यतिक्रममाणं विवादपदं भवतीत्यर्थः। तदुपक्रमार्थं किंचिदाह। राजा कृत्वा पुरे स्थानं ब्राह्मणा
न्न्यस्य तत्र तु। त्रैविद्यं वृत्तिमद्ब्रूयात्स्वधर्मः परिपाल्यतामिति। राजा स्वपुरे दुर्गादौ वा स्थाने धवलगृहादिकं कृ
त्वा तत्र ब्राह्मणान्न्यस्य स्थापयित्वा तद्ब्राह्मणव्रातं त्रैविद्यं वेदत्रयसंपन्नं वृत्तिमद्भूहिरण्यादिसंपन्नं च कृत्वा
स्वधर्मो वर्णाश्रमनिमित्तः श्रुतिस्मृतिविहितो भवद्भिरनुपाल्यतामिति तान्ब्राह्मणान्ब्रूयात्। एवं नियुक्तैस्तैर्यत्कर्त
व्यं तदाह। निजधर्माविरोधेन यस्तु सामयिको भवेत्। सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः॥ श्रौतस्मार्तध
र्मानुपमर्देन समयान्निष्पन्नो यो धर्मो गोप्रचारोदकरक्षणदेवगृहपालनादिरूपः सोऽपि यत्नेन पालनी
यः। तथा राज्ञा च कृतो निजधर्माविरोधेनैव यः सामयिको धर्मोऽपावत्यधिकं भोजनं देयमस्मद्रातिमंडले
तुरंगादयो न प्रस्थापनीया इत्येवंरूपः सोऽपि रक्षणीयः। एवं समयधर्मः परिपालनीय इत्युक्त्वा तदति
क्रमादोषमाह। गणद्रव्यं हरेद्यस्तु संविदं लंघयेच्च यः। सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत्॥ यः पु
नर्गणस्य ग्रामादिजनसमूहस्य संबंधि साधारणं द्रव्यमपहरति। संवित्समयस्तां समूहकृतां सकृता

वापोल्लंघयेदतिक्रमेत्तरतदीयं सर्वस्वहरणशुद्धिप्रवासयेत निष्कासयेत्। अयं च दंडोनुबंधातिशयेन द्रष्टव्यः
अनुबंधाल्पत्वेतुशयोग्रामदेशसंघानां कृत्वा सत्येन संविदं विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत् नि
130 गृह्य दापयेदनं समयव्यभिचारिणः चतुःसुवर्णान्षण्णिष्कान् शतमानं च राजतमिति। मनुप्रतिपादितानां दंड
नां निर्वासनचतुःसुवर्णषण्णिष्कशतमानानां चतुर्णामन्यतमो जातिशक्त्याद्यपेक्षया कल्पनीयः। दंड
॥२३५॥ तैः कर्तव्यमित्याह। कर्तव्यं वचनं सर्वैः समूहहितवादिनः। गणिनां मध्ये समूहहितं वदनं शीलाः तद्वचन
मितरैर्गणान्तर्गतैरनुसरणीयं। अन्यथा दंड इत्याह। यस्तत्र विपरीतः स्यात्स दाप्यः प्रथमं दमं। यः गणिनां
मध्ये समूहहितवादिवचनप्रतिबंधकारी स राजा प्रथमसाहसं दंडनीयः। राज्ञा विदिगणिभिर्वर्त्तनीयमि
त्याह। समूहकार्यप्रयातान्कृतकार्यान्विसर्जयेत् सदानमानसत्कारैः पूजयित्वा महीपतिः। समूहका
निरत्यर्थं त्वपा॥ एवं प्राप्तान्गणिनो निवर्तितात्मीयपुरोजनान् दानमानसत्कारैः स राजा पतितोषय

६८ ॥ परिहारिणं प्रत्याह। समूहकार्यप्रहितो यल्लब्धं तत्तदर्पयेत्। एकादशगुणं दाप्यो
यद्यसौ नार्पयेत्स्वयं। समूहकार्यार्थं महाजनैः प्रेरितो राजपार्श्वं यद्वस्त्वहिरण्यादिकं लब्धं तत्तत्प्राप्य
ज तएवमहाजनेभ्यो निवेदयेत्। अन्यथा लब्धस्यैकादशगुणं दंडं प्रदापनीयः। एवं प्रकाराश्च कार्यचिंतकाः का
र्यद्रूत्या ह। धर्मज्ञाः शुचयो लुब्धा न वै पुंकार्यचिंतकाः कर्तव्यं वचनं तेषां समूहहितवादिनां। श्रोतस्मा
धर्मज्ञाः वा द्याभ्यां तर शौचत्क लोऽर्थेष्वलुब्धाः कार्यविचारकाः कर्तव्याः तेषां वचनमितरतः कार्या
त्येतदादशार्थं पुनर्वचनं। इदानीं त्रैविद्यप्रतिपादितं धर्मं श्रेण्यादिष्वप्यतिदिशन्नाह। श्रेणिनै
गमिपाखंडिगणानामप्ययं विधिः। भेदं चैषां नृपो रक्षेत्पूर्ववृत्तिं च पालयेत्। एकपण्यशिल्पोपजी
विनः श्रेण्यः नैगमाः ये वेदस्याप्तप्रामाण्यं तत्वेन प्रामाण्यमिच्छंति पाशुपतादयः पाखंडिनः ये वेदस्य प्रामा
ण्यमेव नेच्छंति नग्नाटक सौगतादयः गणाः व्रात आयुधीयादीनां मेककर्मोपजीविनां एषां चतुर्विधा
नामप्ययमेव विधिः यो निजधर्माविरोधेनेत्यादिना प्रतिपादितः एतेतां॥

एतेतांचश्रेण्यादीनांचेदंधर्मव्यवस्थांनृपोरक्षेत्। पूर्वांपात्राचवृत्तिंपालयेत्॥ इतिसंविद्व्यतिक्रमप्रक
रणं॥ संप्रतिवेतनस्यानपाकर्माख्यंव्यवहारपदंप्रस्तूयते। तत्स्वरूपंनारदेनोक्तं। भृतानांवेतनस्यापाकर्मा
नोदानविधिः। क्रमः वेतस्यानपाकर्मतद्विवादपदंस्मृतमिति। अस्यार्थः भृतानांवेतनस्यवक्ष्यमाण
13। स्तोवैकहस्तोदानिदानिविधिःक्रमोपत्राविवादपदंवेतनस्यानपाकर्मेत्युच्यते। तत्रनिर्णयमाह। गृही
१३२॥ तवेतनकर्मत्यजन्द्विगुणंभावहेत्। अगृहीतेसमंदद्याद्भृत्यैरक्ष्यउपस्करः। गृहीतवेतनंयेनअ।
सोस्वांगःकृतकर्मत्यजन्अकुर्वन्द्विगुणंभृतिस्वामिनेदद्यात्। यदापुनरनुपगतंकर्मअगृहीत
एववेतनेत्यजतितदासमंपदद्यात्तनचानुपगतंतावद्धाव्योनद्विगुणं। पद्धंगीकृतांभृतिंदत्वाबलात्का
रापितः [illegible] कर्मकुर्वन्प्रतिष्कृत्यकार्योदयत्वाभृतिंबलादितिनारदवचनात्। भृतिरपितेनैवोक्ता।
भृतपेवेतनंदद्यात्। कर्मस्वामीयथाक्रमं। आदौमध्येवसानेवाकर्मणःपादिनिश्चितमिति। ते
श्चभृत्यैरुपस्कः॥ रउपकरणंलांगलादानांगुरक्षणीयादिरेवंवस्याशङ्कयारक्षणीयमितस्याक्रम ২৬१

दिनिष्पत्त्यनुपपत्तेः भृतिमपरिच्छिद्य यः कर्म कारयितं प्रत्याह। दाप्यस्तु दशमं भागं वाणिज्यपशुसस्यतः। अ
निश्चित्य भृतिं यस्तु कारयेत्स महीक्षिता। यस्तु स्वामी वणिक्‌गोमान् क्षेत्रिको वा अपरिच्छिन्नवेतनमेव भृतिं
कर्म कारयति स तस्माद्वाणिज्यपशुसस्यलक्षणात् कर्मणः फलं यल्लब्धं तस्य दशमं भागं भृत्याय महीक्षिता
दापनीयः। आज्ञानाज्ञाकारिणं प्रत्याह। देशं कालं च योतीयाल्लाभं कुर्याच्च योन्यथा। तत्र स्यात्स्वामिनः
छंदोधिकं देयं कृतेधिके। यस्तु भृत्यः पण्यविक्रयार्थं चितं देशं कालं च पण्यविक्रयार्थं कुर्वन् दर्शादिने
लंघयेत् तस्मिन्नेव देशे च काले च लाभमन्यथा व्ययादतिशयं साधयतः यः नं करोति तस्मिन् भृतके भृतिदानं प्रति स्वा
मिनः छंदः इच्छा भवेद्यावदिच्छति तावद्दद्यान्न पुनः सर्वामेव भृतिमित्यर्थः। यदा पुनर्देशकालातिलङ्घनतयाधिको लाभः
कृतस्तदा पूर्वपरिच्छिन्नाया भृतेरधिकमपि धनं स्वामिना भृत्याय दातव्यं। अनेकभृत्यसाध्यकर्मणि भृतिदानप्रक
ारमाह यो यावत्कुरुते कर्म तावत्तस्य तु वेतनं। उभयोरप्यसाध्यं तत्साध्यं कुर्याद्यथाश्रुतं। यो दापनेरः कर्मैव कर्म
नियतवेतनमुभाभ्यां क्रियमाणमुभयोरप्यसाध्यं व्याधिना वारणत्वा। अपिशब्दाद्बहुभिरपि यदिनसमा

पितंतदाप्पोऽत्यापावत्कर्मकरोतितस्मैतत्कृतकर्मानुसारेणमध्यस्थकल्पितंवेतनंदेयंपुनःसमं।नचावपवशः॥कर्म
णिवेतनस्यापरिभाषितत्वात्तावद्दानमितिनमंतव्यं।साध्येतुविनाव्यांकर्मणिनिवर्त्तेतयथाकृतंपावत्परिभाषितं
तावद्भागन्यादेयंनपुनःप्रत्येकंकृत्स्नंवेतनंनापिकर्मानुरूपंपरिकल्पितंदेयं।आयुधीयभारवाहकौप्रत्याह।अराज
दैविकंनष्टंभांडंदाप्यस्तुवाहकः।प्रस्थानविघ्नकृच्चैवप्रदाप्योद्विगुणांभृतिः।नवेघतेराजदैविकंयस्यभांडंस्यतत्र
योक्तंतद्यदिप्रज्ञाहीनतयावाहकेननाशितंतदानशानुसारेणसोतदंडंदापनीय।तथाहनारद।भांडंव्यस
॥१३२॥ नमागच्छेद्यदिवाहकोदायतःदाप्योयत्नात्तूनशेषंद्यदैवराजकृतादृतेइति।पंपुनर्विहायमंगलकप्रतिवा
सरेप्रतिष्ठमानस्यतत्प्रस्थानेपापिकंकर्मप्रारंभेकृत्यद्दानंनकरिष्यामीतिप्रस्थानविघ्नमाचरतितदासे
द्विगुणांभृतिंदाप्यः।अल्पतोत्कर्षहेतकर्मनिरोधाधात्।किंचाप्रक्रांतेसप्तमंभागंचतुर्थपथिसंत्यजन्।भृति
धर्मपथेसर्वांप्रदाप्यस्स्याज्जकोपिवा।प्रक्रांतेच्छ्यवसितेप्रस्थानेस्वांगाकृतंकर्मयस्यजतस्तैभृतेःसप्तम
भागंदाप्यः।नन्वचैवविषयेप्रस्थानेते।तैरप्राणिनिर्यदेवनंक्रीडापाणप्रवर्विकास्त्रिपते।तथावयोभिःपीसि

मनुना। अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते प्राणिभिः क्रियमाणस्तु स विज्ञेयः २ समाह्वयः॥ देहिनां शतिकवृद्धेस्तु सभिकः

कुक्कुटादिभिः यथाह मनुः मेषमहिषाकाक्रीडा क्रियते तदुच्यते पंचधाक्रमेण द्यूतसमाह्वयाख्यं विवादपदं द्यूतं वस
हूयते तत्समाह्वय इति। तत्र भूतस्याधिकों द्युक्तीर्त्या नाहि द्विगुणं अतिदानमुक्तो भिदानं सप्तमो भाग इति
रोधः उच्यते अत्यंतरा पादनावसरस्से न्नेवे स्वांगाक्ते तंकर्मपरस्य ज्ञति तस्य सप्तमो भागः पस्तु पुरस्थानत्कं ने स
परवत्य ज्ञति तस्य द्विगुणं अतिदानमित्यविरोधः यः पुनः पथि प्रक्तो तेगमनेव वर्तमाने सति कर्मत्यजति स अते भृतु भागं द
प्यः अर्धपथे पुनः सर्वदाप्य पस्तत्या जककर्मत्यजतत्याड्यपतिस्वामी पूर्वोक्तं प्रदेशोस्सावपिपूर्वोक्ते सप्तमं भागं द
कं अत्याजदाप्यनाप्यः एतच्च व्याधितादि विषयं। अतोनार्तो निकुर्याद् घोदर्पात्कर्मपयेदितो। संदशः क्रमेत्तल्लान
व १ दैरानंदेयं तस्य वेतन मिति मनुस्मरणात्। यदापुनर्व्याध्यादीपगते तं तरिति दिवसाभ्यरिगाणप्य पुनः पूरयति तदात्त
नेतरव वेतनं। आर्तस्तु कुर्यात्स्वस्थः सन्यथाभाषितमादितः सुदीर्घस्यापिकालस्य स्वतान्नेतव वेतन मिति मनु
स्मरणात्। यस्त्वपगतव्याधिः स्वस्थ एव चालस्यादि नास्वारब्धं कर्मन्यो न करोति परेण वा न समापद् इति न तस्य
वेतनं देयं यथाम नुः यः यथा क्रमात्तैः [illegible] ततस्य वेतनं देयमल्पोनस्यापि कर्मण इति

इति चेतनादानप्रकरणं ॥ अथ द्यूतसमाह्वयाख्यं विवादपदमभिधीयते तत्स्वरूपं नारदेनाभिहितं । अक्षवध्रश
लाकाद्यैर्देवनं जिह्मकारितं पणक्रीडा वयोभिश्च पदं द्यूतसमाह्वयं । अक्षाः पाशकाः वध्रश्चर्मपट्टिकाः शलाकादंतादिम
133 य्यो दीर्घचतुरस्राः आद्यग्रहणाच्चतुरंगादिक्रीडासाधनं कीरतुरगरथादिकं गृह्यते तैरप्राणिभिर्यद्देवनं क्रीडा प
णपूर्विका क्रियते तथा वयोभिः पक्षिभिः कुक्कुटादिभिः चशब्दान्मल्लमेषमहिषादिभिश्च प्राणिभिर्या पणपूर्वि
का क्रीडा क्रियते तदुभयं यथाक्रमेण द्यूतसमाह्वयाख्यं विवादपदं द्यूतं च समाह्वयं च तदुक्तं मनुना । अप्राणिभिर्य
त्क्रियते तल्लोके द्यूतमुच्यते । प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वयः इति । तत्र द्यूतसभाधिकरणवृत्तिमा
१३३॥ ह ॥ ग्लहे शतिकवृद्धेस्तु सभिकः पंचकं शतं । गृह्णीयाद्धूर्तकितवादितराद्दशकं शतं । परस्परं संप्रतिपत्त्या कितवपरिकल्पि
तः पणो ग्लह इत्युच्यते । तत्र ग्लहे तदाश्रयपाशादिकापरिमितादधिकपरिमाणा या वृद्धिर्यस्यासौ शतिकवृद्धिः तस्मा
द्धूर्तकितवात्पंचकं शतं आत्मवृत्त्यर्थं सभिको गृह्णीयात् । पंचपणा आपाद्या अस्मिन् शते तत्पंचकं शतं तदस्मिन्वृद्ध्यु
त्पत्त्येत्यादिना कन् जितग्लहस्य विंशतितमं भागं गृह्णीयादित्यर्थः । सभिकः कितवनिवासार्था यस्यास्ति असौ सभि

कः कल्पिताक्षादिनिखिलक्रीडोपकरणस्तदुपचितद्रव्योपजीवीसभापतिरुच्यते। इतरस्मात्पुनरपिपरिपूर्णे श
तिकवृद्धिकितवाद्दशकंशतं जितद्रव्यस्यदशमंभागंगृह्णीयादितिपादवत्। एवंक्लृप्तवृत्तिनासभिकेनकिंकर्तव्यमि
त्यतआह। ससम्यक्पालितोदद्याद्राज्ञेभागंयथाकृतं जितमुद्ग्राहयेज्जेत्रेदद्यात्सत्यवचःक्षमीः। एवंक्लृप्तवृ
त्तिर्द्यूताधिकारीसराज्ञाधूर्त्तकितवेभ्योरक्षितस्तस्मैराज्ञेयथासंप्रतिपन्नमंशंदद्यात्। तथाजितंयद्द्रव्यंतद्ग्राह
येद्बंधकग्रहणेनासेधादिनाचपराजितसकाशादुद्धृत्यचतद्धनंजेत्रेसभिकोदद्यात्तथाक्षमी
भूत्वासत्यंवचोविश्वासार्थंद्यूतकारिणांदद्यात्। तदुक्तंनारदेन। सभिकःकारयेद्द्यूतंदेयंदद्याच्चतत्कृतमितियदा
पुनःसभिकोदापयितुंनशक्नोतितदाराजादापयेदित्याह॥ प्राप्तेनृपतिनाभागेप्रसिद्धेधूर्त्तमंडले। जितंससभि
केस्थानेदापयेदन्यथानतु। प्रसिद्धेअप्रच्छन्नेराजाध्यक्षसमन्वितेसभिकसहितेकितवसमाजेसभिकेनदत्तराजभा
गदत्तेराज्ञाधूर्त्तकितवमविप्रतिपन्नंजितंपणंदापयेत्। अन्यथाप्रच्छन्नेसभिकरहितेअदत्तराजभागेद्यूतेजि
तंपणंजेत्रेनदापयेत्। जयपराजयविप्रतिपत्तौनिर्णयोपायमाह। द्रष्टारोव्यवहाराणांसाक्षिणश्चतएवहि। द्यूत

व्यवहाराणां दुष्टाराज्यांस्तरवकितवारवराज्ञा नियोक्तव्याः न तत्र गस्कृताध्ययनसंपन्नादिनियमोस्ति । साक्षिण
२रा श्च द्यूते द्यूतकारा एव कार्याः न च तत्र स्त्रीबाल्ववृद्धकितवेत्यादिनिषेधोस्ति । क्वचिद्द्यूतं निषेद्धुं दंडमाह । राज्ञः सचिह्नं
निर्वास्याः कूटाक्षोपधिदेविनः कूटरेखादिनिरुपधिनाचमतिवंचनहेतुनामणिमंत्रौषधादिना पेदाव्यौते
134 तानप्यपदादिनांकयित्वा राज्ञा स्वराष्ट्रान्निर्वासयेत् । नारदेनतिर्वासने विशेष उक्तः कूटाक्षदेविनः पापान्राज
राष्ट्राद्विवासयेत् । कंठे क्षमालामासज्य स ह्येषां विनयः स्मृतमिति । पानिवमनुवचनानि द्यूतनिषेधपराणि ।
१३४॥ द्यूतं समाह्वयं चैव यः कुर्यात्कारयेत वा तान्सर्वान्घातयेद्राजा शूद्रांश्च द्विजलिंगिन इत्यादीनि तान्यपि कूटाक्षदे
वनविषयतया चोपाद्यानि । किंच ॥ द्यूतमेकमुखं कार्यात्तस्करज्ञानकारणात् । यः पूर्वोक्तो द्यूते तदेकमुखमेक
मुखं प्रधानं यस्य द्यूतस्य तत्तथोक्तं कार्यं राज्ञाध्यक्षाधिष्ठितं राज्ञा कारयितव्यमित्यर्थः । तस्करज्ञानकारणा
त्तात्तस्करज्ञानरूपप्रयोजनं प्रर्ततोत्यप्रायशश्चौर्योपार्जितधना एव कितवा भवंत्यतश्चौरविज्ञानार्थमेवमुक्ता
र्थं द्यूतधर्मं समाह्वये अतिदिशन्नाह ॥ एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये सहशातिकव्यहरित्यानायो

योऽधूतधर्म उक्तः सरवप्राणि द्यूतेमल्लमेषमहिषादि विनिवर्त्यं समाह्वयसंज्ञके ज्ञातव्यः इति द्यूतसमाह्वया-
ख्यप्रकरणं इदानीं वाक्पारुष्यं प्रस्तूयते। तल्लक्षणं चोक्तं नारदेन। देशजातिकुलादीनामाक्रोशन्यंगसंयुतं। यद्व-
चः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते देशादीनामाक्रोशन्यंगसंयुतं। उच्चैर्भाषमाणं आक्रोशन्यंगमवद्यं
तदुक्तं यत्फलं प्रतिकूलार्थं उद्वेगजननार्थं वाक्यं तत् वाक्पारुष्यं कथ्यते तत्र कलहप्रियाः खलु गौडा इति
देशाक्रोशः नि। नांतरं खलु लोलुपा विप्रा इति जात्याक्रोशः। क्रूरवैरिज्ञाः खलु वैश्वामित्रा इति कुलाक्षेपः आदि
ग्रहणात् विद्याशिल्पादिनिंदया विद्वत्शिल्प्यादिपुरुषाक्षेपकारः गृह्यते। तस्य च दंडतारतम्यार्थं निष्ठु-
रादित्रैदेन त्रैविध्यमाभिधाय तल्लक्षणं तेनैवोक्तं। निष्ठुराश्लीलतीव्रत्वात्तदपि त्रिविधं स्मृतं गौरवानुक्र-
मात्तस्य दंडोऽपि स्यात्क्रमाद्गुरुः साक्षेपं न्यंगसंयुक्तमिति। न्यंगं असत्यमवद्यं भगिन्यादिगमनं तदुक्तं
मश्लीलं सुरापो मात्रादि महापातकाद्याक्रोशयुक्तं वचनं तीव्रं तत्र निष्ठुराक्रोशे सवर्णविषये दंडमाह। स
२॥ निष्ठुरं ज्ञेयमश्लीलं न्यंगसंयुतं। पतनीयैरुपाक्रोशैः तीव्रमाहुर्मनीषिणः इति तत्र धिक् मूर्ख जाल्मत्वमित्यादि साक्षेप

त्यासत्यान्यथास्तोत्रैर्न्यूनांगेंद्रियरोगिणां। क्षेपं करोति चेद्दंड्यः पणानर्धत्रयोदशान्न्यूनांगाः करचरणादि
विकलाः न्यूनेंद्रियाः नेत्रश्रोत्रादिरहिता रोगिणो दुश्चर्मप्रभृतयस्तेषां सत्येनासत्येन अन्यथास्तोत्रेण च
निंदार्थया स्तुत्या पद्मनेत्र पुंगहीन एवंविध उच्यते तत्सत्यं पद्मपुनरक्षस्थानेवांध इत्युच्यते। तदसत्यं पद्म
135 विकृताक्षितिरेव दर्शनीयस्त्वमसीत्युच्यते। तदन्यथास्तोत्रं एवंविधं तथ्येनापि वृथवन्दन्यापादंडं कार्षापण
त्रयमिति पन्मनुवचनं तदपि दुर्वृत्तवर्णविषयं। यदा पुनः पुत्रादयो मात्रादीन् दूषयंति तदा शतं दंडनीया इति
२०६॥ तिनैवोक्तं। मातरं पितरं जायां भ्रातरं श्वसुरं गुरुं। आक्षारयन् शतं दाप्यः पंथानं वाददद्गुरोरिति। एतच्च सा
१३५॥ पराधेषु मात्रादिषु गुरुषु निरपराधायां च जायायां द्रष्टव्यं। अश्लीलाक्षेपे दंडमाह॥ अभिगंतास्मि भगि
नीं मातरं वा तवेति ह॥ शपंतं दापयेद्राजा पंचविंशतिकं दमं। त्वदीयां भगिनीं मातरं वाभिगंतास्मीति शप
तमन्यं तज्जायामभिगंतेत्येवं शपतं राजा पंचविंशतिकं पणानां पंचाधिकां विंशतिं पअस्मिन्दंडे सुतयोर्नः दंडमदाप
येत्। एवं समानगुणेष्वभिधाय विषमगुणेषु दंडं प्रतिपादयितुमाह। अर्धोऽधमेषु द्विगुणः परस्त्रीषु

त्तमेषु च। अधमेध्याक्षेत्रपेक्षयान्यूनत्रैवर्णिकेषु अर्धो दंडः पूर्ववाक्ये पंचविंशतेः प्रक्रान्तत्वात्तदपेक्षयाऽ
र्धः सार्द्धद्वादशपणात्मको दंडः द्रव्यः परनार्यासु पुनर्विशेषेण द्विगुणः पंचविंशत्यपेक्षया पंचाशत्पणात्मको द
ण्डः तथा त्तमेषु च स्वापेक्षयाधिक कृतिवत्तेषु दंडः पंचाशत्पणात्मकः एवं वर्णानां मूर्धावसिक्तादीनां च प
रस्पराक्षेपे दंडकल्पनामाह॥ दंडप्रणयनं कार्यं वर्णजात्युत्तराधरैः वर्णा ब्राह्मणादयः। जातयो मूर्द्धावसि
क्ता द्याः तस्मात्ते जातयः। उत्तराश्चाधराश्च उत्तराधराः वर्णजातयश्च ते उत्तराधराश्च वर्णजात्युत्तराधरा
स्तैर्वर्णजात्युत्तराधरैः परस्पराक्षेपे विपमाणे दंडस्य प्रणयनं प्रकर्षेण नयनमूहनं वोढव्यं। तच्च दंडक
ल्पनं उत्तराधरैरितिविशेषोपादानादुत्तराधरभावापेक्षया कर्तव्यमित्यवगम्यते। उत्तराधराश्च यथा
मूर्द्धावसिक्तं ब्राह्मणहीनं क्षत्रियापादुत्पन्नं चाकुस्य ब्राह्मणः स्वत्रयो क्षेपनिमित्तात् पंचाशत्पणाद्दंडात्किंचि
दधिकं पंचसप्तत्यात्मकं दंडमर्हति। क्षत्रियोपिति माकुस्य ब्राह्मण क्षेपनिमित्तात् दंडादूनपंच

सप्रतिमेव दंडं मूर्द्धावसिक्तोपितिमान्क्षत्रियस्तमेव दंडमेवमर्हति। मूर्द्धावसिक्तांबष्ठयोः परस्परा क्षेपे ब्राह्म

136 दसे त्रिपयोः परस्परः क्रोशनिमित्तिकौ यथाक्रमेण दंडौ वेदितव्यौ। एवमन्यत्राप्यूहनीयं। एवं सर्ववर्णविषये दं

मत्रि घापवर्णानामेवप्रतिलोमानुलोमाक्षेपे दंडमाह। प्रतिलोम्यापवादेषु द्विगुणत्रिगुणादमाः वर्णानामान

तोनतस्मादर्द्धार्द्धहानितः। अपवादास्त्वधिक्षेपाः प्रतिलोम्यनापवादाः प्रतिलोम्यापवादास्तेषु ब्राह्मणाक्रो

१२६॥ शकारिणः क्षत्रियवैश्ययोर्यथाक्रमेण पूर्ववाक्याद्विगुणप दोपरत्र पंचाशत्पणापेक्षयाद्विगुणाः शतपणेन मा।

१२७॥ त्रिगुणः सार्द्धशतपणो दंडो वेदितव्यः। शूद्रस्य ब्राह्मणाक्रोशतो जिह्वाछेदनं वा भवति। यथाह मनुः। श

तं ब्राह्मणमाक्रुश्य क्षत्रियो दंडमर्हति। वैश्योप्यर्द्धशतं चैव शूद्रस्तु वधमर्हतीति विट्शूद्रयोरपि क्ष

त्रिया दन्तरैकांतरयोस्त्वानुलोम्यापतेपाशतमध्यर्द्धशतं च यथाक्रमेण क्षत्रियाक्रोशे वेदितव्यौ। शूद्रस्य

च वैश्याक्रोशे शतं अनुलोम्येन तु वर्णानां क्षत्रविट्शूद्राणां वा ब्राह्मणेनाक्रोशे कृते तस्माद्ब्राह्मणक्रोशानि

मित्राष्टकृतपरिमितास्तत्र दंडास्तत्रातिवर्णिमर्धस्यार्धस्य हानिं कृत्वावशिष्टं पंचाशत्यं चविंशत्यर्द्धत्रयोदशपणात्म
केषु यथाक्रमं ब्राह्मणेन दंडनीयः तदुक्तं मनुना। पंचाशतं ब्राह्मणेन दंडः क्षत्रियस्याभिशंसने। वैश्यस्याप्यर्धपंच
शच्छूद्रे द्वादशको दम इति। क्षत्रियाणां वैश्यशूद्रेष्वाक्रुश्य यथाक्रमं पंचाशत्यं चविंशतिकौ दमौ वैश्यस्य शूद्राक्रो
शे पंचाशदित्यूहनीयं। ब्राह्मणराजन्यवत् क्षत्रियवैश्ययोरिति गौतमस्मरणात्। विट्शूद्रयोरेवमेव स्वजा
तिप्रतितत्वत इति मनुस्मरणात्। पुनर्निष्ठुराक्षेपमधिकृत्याह। वहन्गर्वान्नेत्रसक्थ्नोर्विनाशवाचके दमः
शत्यस्तदर्धिकः पादनासाकर्णकरादिषु। वाचकदानां प्रत्येकं विनाशवाचिके वाचप्रतिपादितेतववाक्छि
न ध्यात्येवं नृपकेस्यतः शतपरिमितो दंडो देयदतव्यः पादनासादिषु आदिग्रहणात् स्फिगादिषु वाचके विना
शे तदर्धिकः तस्य शतस्यार्धं तदर्धं तस्मात्तातिततदर्धिकः पंचाशत्पणिको दंडो वेदितव्यः। किंचाशक्तस्त
केन्नेव दंडनीयः पणानां दशात्तथाशक्तः पतिचुवं दाप्यः क्षेमापतस्यतु पः पुनः ज्वरादिना क्षीणशक्ति

स्कन्द वाङ्गाद्यंग न्यंगकरो मात्यपश्यापतस्सो दशपणान्दंडनीयः यः पुनः समर्थः क्षीणराशि पूर्ववदाक्षिपत्य सैोपूर्वोन्कश
शतादिदंडान्तरकाले तस्माशाक्तस्य क्षेमार्थं प्रतिभुवं दापनीयः। तावुभौ क्रोशदंडमाहः पतनीय कृते क्षेपे दंडं मध्य
मसाहसः उपपातकयुक्ते तु दाप्यः प्रथमसाहसं पातित्यहेतुर्निर्ब्रह्महत्यादिर्निर्वर्णितनामा क्षेपे मध्यमसाहसो दंड
137 उपपातकसंबंधे पुनर्गोघ्नस्त्वमसीत्येवमादिरूपे प्रथमसाहसं दंडनीयः किंच त्रैविद्यनृपदेवानां क्षेप उत्तमसाहस
मध्यमो जातिपूगानां पृथग्ग्रामदेशयोः त्रैविद्यो वेदत्रयसंपन्नास्तेषां राज्ञो देवानां च क्षेपे उत्तमसाहसो दंडः ग्राम
२२९॥ देशयोः प्रत्येकमाक्षेपे प्रथमसाहसो दंडो वेदितव्य इति। इति वाक्पारुष्यं नाम विवादप्रकरणं। दंडपारुष्यसंप्र
प्रस्तूयते तल्लक्षणं नारदेनोक्तं। परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः भस्मादिभिश्चोपघातो दंडपारुष्यमुच्य
त इति। परगात्रेषु स्थावरजंगमात्मकेषु द्रव्येषु हस्तपादायुधैः आदिग्रहणात् ग्रावाणादिभिर्यो भिद्रोहो हिं
सनं दुःखोत्पादनं तथा। भस्मना आदिग्रहणात् पंकपुरीषाद्यैश्च उपघातः संस्पर्शनरूपं मनो दुःखोत्पा
दनं तद्दुभयं दंडपारुष्यं दंड्यते ऽनेनेति दंडो देहस्तेन यत्पारुष्यं विरूपकरणं जंगमादेर्द्रव्यस्य तद्दंडपारुष्यं
तस्य चावगोरणादिकरणेन त्रैविध्यमभिधाय हीनमध्यमोत्तमद्रव्यरूपकर्मत्रैविध्यात्पुनस्त्रैविध्यं

नैवोक्ता। तस्यापि दुष्टत्वैविध्यं हीनमध्योत्तमक्रमात् अवगोरणनिःसंगपातनक्षतदर्शनैः हीनमध्योत्तमानां
तु द्रव्याणां समतिक्रमात्। त्रीण्येव साहसान्याहुः सूत्रकं कंटकशोधन इति निःसंगपातनं निःशंकप्रहरणं। त्री
ण्येव साहसानि त्रिःप्रकाराण्येव साहसकृतानि दंडपारुष्याणीत्यर्थः तथा वा दंडपारुष्ये पारुत्त्रयोरपि द्वयो
प्रवृत्तकलहयोर्मध्ये यः क्षमते न तस्य दंडाभावः किंतु पूर्वस्यैव तथा पूर्वं कलह प्रवृत्तस्य दंडगुरुत्वं। कलहे व
हु वैरानुसंधानुरेव दंडो न्क्रोत तयोर्द्वयोरपराधविशेषापरिज्ञाने दंडः समः तथा श्वपचादिभिः रार्याणाम
पराधे कृते सज्जना एव दंडदापनेऽधिकारिणः तेषामशक्यत्वे तान्राजा घातयेदेव नार्थं गृह्णीयादित्येवं पंच
प्रकारा विध्यपने वोक्ताः विधिः पंचविधस्तूक्तः एतयोः पारुष्ययोरपि। पारुष्ये सति संरम्भादुत्पन्ने क्रुद्धयोः सामन
स्येयः क्षमते दंडभाग्योऽतिवर्तते। पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स दोषवान् पश्चाद्यः सोऽप्यसत्कारी पूर्वे
तु विनयो गुरुः। द्वयोरापन्नयोस्तुल्यमनुबध्नाति यः पुनः स तयोर्दंडमाप्नोति पूर्वो वा यदि वेतरः। पारु
ष्य दोषावृतयोः युगपत्संप्रवृत्तयोः विशेषश्चेन्न लक्ष्येत विनयः स्यात्समस्तयोः। श्वपाकपंडचंडाल

व्यंगेषु वधबन्धिषु । हस्तिप्रवृत्तदासेषु गुर्वाचार्यातिगेषु च । मर्यादातिक्रमे सद्यो घात एवानुशासनं । पमे
वहत्यतिवर्तेरन्नेनेसंतंडनेनेरषु । स एव विनयं कुर्यान्न तद्विनयभाङ्नृपः मला हेते मनुष्याणां धनमेषां म
न्नात्मकं । अतस्तान् घातयेद्राजा नार्थदंडेन दंडयेदिति । एवं भूतदंडपारुष्यनिर्णयपूर्वकत्वाद्दंडप्रण
138 यनस्य तल्लक्षणापसंदेहनिरासपहेतुमाह । असाक्षिके हते चिह्नैर्युक्तिभिश्चागमेन च । द्रष्टव्यो व्यवहारस्तु
कूटचिह्नकृतो नृपात् पदा वक्ष्यद्रुहस्य हमेनेनाहत इति रेजनिवेदयति तदा चिह्नैर्व्रणादिभिः स्वरूपग
श्लो तैर्लिंगयुक्त्या कारणप्रयोजनपर्यालोचनात्मिकया आगमेन जनप्रवादेन च शब्दादूषदृष्टेन वा कूटचिह्नकृ
२२८॥ त्वं नैत्वावनीनृपात्परीक्षा कार्या । एवं निश्चिते साधनविशेषेण दंडविशेषमाह । भस्मपंकरजस्पर्शे दंडोदं
शपणः स्मृतः । अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणस्ततः । समेष्वेवं परस्त्रीषु द्विगुणास्तूत्तमेषु च । हीने
ष्वर्द्धदमो मोहमदादिभिरदंडनं । भस्मना पंकेन रजसा वायः परस्पर्शयत्यस्यादशपणो दोषः । अमेध्या
ति अश्रुश्लेष्मनखकेशकर्णविण्मूत्रमुताश्छर्द्यादि पंचगृह्यते । पार्ष्णिः पादस्य पश्चिमो भागः निष्ठ्यूतं मु

खनिः सारितं ज्वलन्तैः स्पर्शने ततः पूर्वाद्दशपणाद्द्विगुणो विंशतिपणो दंडो वेदितव्यः पुरीषादिस्पर्शने पुनः
कात्यायनेन विशेष उक्तः छर्दिमूत्रपुरीषाद्यैरापाद्यः स चतुर्गुणः षड्गुणः कायमध्ये स्यान्मूर्ध्नि त्वष्टगुणः स्मृत इति
आदिग्रहणाद्वसामज्जास्रक्श्लेष्मादयो गृह्यन्ते एवं भूतः पूर्वोक्तो दंडः सवर्णविषये द्रष्टव्यः परस्त्रीष्वासु च विशे
षेण तथोत्तमेषु स्यात् सपादाधिकमूर्तवत्तेषु पूर्वोक्तो दशपणाद्विंशतिपणाच्च दंडाद्द्विगुणो वेदितव्यः हीनेषु स्व
पेक्ष्यपान्न्यूनमूर्ताद्दिषु पूर्वोक्तस्यार्धं दमः पंचपणो दशपणश्च वेदितव्यः मोहाम्वित्वैवकल्प्यं मदो मद्यपानजन्यैव
स्थाविरोधः आदिग्रहणात्क्रहावेशादिकं एतैः पैर्क्नेन नस्यादिभिः स्पर्शने क्षते पदंडो न कर्तव्यः प्रतिलोमापराधे
दंडमाह। विप्रपीडाकरं छेद्यमंगमब्राह्मणस्य तु। उद्गूर्णे प्रथमो दंडः स्पर्शने तु तदर्धिकः ब्राह्मणानां पीडाकर
मब्राह्मणस्य क्षत्रियादेर्यदंगं करचरणादिकं तच्छेत्तव्यं क्षत्रियो वैश्यो वापि पीडां कुर्वतः मृदुस्पांगच्छेदनमे
व। येन केनचिदंगेन हिंस्याच्छ्रेयांसमंत्यजः छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनमिति हि जातिमा
त्रापराधे मृदुस्पांगच्छेदनविधानाद्वैश्यस्यापि क्षत्रियापकारिणः पण एव दंडस्तत्तुल्यन्यायत्वात् उद्गूर्णे वध

र्थमुद्यते शस्त्रादिके प्रथमः साहसो वेदितव्यः मृदुस्य पुनस्तदुरणे हस्तादिच्छेदनमेव। पाणिमुद्यम्य दंडं वा पाणि
 छेदनमंतातिमनुस्मरणात् तच्छेद्रोयणार्थं शस्त्रादिस्पर्शने तु तेदर्धकः। प्रथमसहसादर्धं दंडो वेदितव्यः। ज्ञनस्मा
दिसंस्पर्शे पुनः क्षत्रियवैश्ययोः प्रातिलोम्यापवादेषु द्विगुणं त्रिगुणादमाइतिवाक्याच्छूद्रस्यान्योपि नकल्प्या। मू
139 द्रस्यतत्रापि हस्तच्छेद एव। अवनिष्ठीवतोदंपाद्वौवाष्ठौच्छेदपेन्नृपः अवमूत्रयतो मेद्रमवशर्धयतो गुदमिति मनुस्म
रणात। एवं प्रातिलोम्यापराधे दंडमभिधायपुनः सजातिमधिकृत्याह। उद्गूर्णे हस्तपादे तु दशविंशतिकौ दमौ
२४०॥ परस्परं तु सर्वेषां शस्त्रे मध्यमसाहसः। हस्तपादेवाताडनार्थमुद्गूर्णे यथाक्रमं दशपणं विंशतिपणश्च दंडोवे
दितव्यः परस्परवधार्थे शस्त्रे उद्गूर्णे सर्वेषां वर्णानां मध्यमसाहसो दंडः। किंच। पादकेशांशुककरोच्छनं चनेषु पणा १९
२२९॥ न्दश। पीडाकर्षांशुकावेष्टपादाध्यासे शतं दमः। पादकेशवस्त्रकराणामन्यतमं गृहीत्वा यः उद्दंचति असौ दशपणं
दंड्यः पीडाचाकर्षश्चांशुकावेष्टश्च पादाध्यासश्च पीडाकर्षांशुकावेष्टपादाध्यासं तस्मिन्समुच्चिते शतं दं
ड्यः एतदुक्तं भवति। अंशुकेनावेष्ट्य गाढमापीड्य आकृष्य च पः पादेन घट्टयति तं शतपणं दमयेदिति किंचा शोणि

तेनविनाकुर्वन्दुःखंकाष्ठादिभिर्नरः।द्वात्रिंशतंपणंदंड्योद्विगुणंदर्शनेस्रजः।यःपुनःशोणितंयथानदृश्यतेतंमृ
दुताडनंकाष्ठलोष्ठादिभिःकरोत्यसौद्वात्रिंशतंपणान्दंड्यः।यदापुनर्गाढताडनेनलोहितंदृश्यते।तदाद्वात्रिं
शतोद्विगुणंचतुःषष्ठिपणंदंडनीयःत्वगस्थिभेदकइति।किंच।करपाददंतोभंगेछेदनेकर्णनासयोःमध्योदंडोव्र
णोद्भेदेमृतकल्पहतेतथा।करपाददंतस्यपृथक्भंगेकर्णनासस्यप्रत्येकंछेदनेव्रणस्योद्भेदेमृतकल्पेप
थाभवति।तथाहतेताडितेमध्यमसाहसोवेदितव्यः।अनुबंधादिनाविषयस्यसाम्यमात्रोपादनीयं।किंच।चे
ष्टाभोजनवाग्रोधेनेत्रादिप्रतिभेदने।कंधराबाहुसक्थ्नांचभंगेमध्यमसाहसः।गमनभोजनभाषणेनिरो
धेनेत्रस्यआदिग्रहणाज्जिह्वापाण्योप्रतिभेदेकंधराग्रीवाबाहूःप्रसिद्धःसक्थिऊरुस्तेषांप्रत्येकंभंजनेमध्यमसा
हसोदंडः।अपिच।एकंघ्नतांबहूनांतुयथोक्ताद्द्विगुणोदमः।यदापुनर्बहवोमिलिताएकस्यांगभंगादिकंकुर्वंतितदापास्मि
न्यस्मिन्नपराधेयोयोदंडउक्तस्ततद्वितस्माद्द्विगुणोदंडःप्रत्येकंवेदितव्यः।अतिक्रूरत्वात्तेषांप्रतिलोम्यानुलो
म्यापराधयोरप्येतस्यैवसवर्णविषयेविहितस्यदंडजातस्यवाक्यांतरेणप्रातिलोम्येनहानिंवृद्धिंचकल्पयेत्।वाक्य

रुष्येयएवोक्ताः प्रतिलोमानुलोमतः त एव दंडाः पारुष्ये दाप्या राज्ञा यथाक्रममिति मनुस्मरणात्। किंच। कलहा॥
पहृतं देयं दंडश्च द्विगुणस्ततः कलहे वर्त्तमानेन यद्धनापहृतं तत्तेन प्रत्यर्पणीयं। अपहृतद्रव्याद्द्विगुणश्चापहारनि
मित्तो दंडो देयः किंच। दुःखमुत्पादयेद्यस्तु स समुत्थानजं व्ययं। दाप्यो दंडश्च यो यस्मिन्कलहे समुदाहृतः यो यस्य
स्य ताडनादिना दुःखं समुत्पादयेत् तस्य आव्रणरोपणादौषधार्थं पथ्यार्थं च यो व्ययः क्रियते तं दद्यात्। सम
त्थमं व्रणरोपणं यस्मिन्कलहे यो दंडस्तं च दद्यान्न समुत्थानजं व्ययमात्रं परगात्राभिद्रोहे दंडमुक्त्वा मंतरे वा
॥२८७॥ हिरंगार्थनाशे दंडमाह। अभिघाते तथा छेदे भेदे कुड्यावपातने। पणान्दाप्यः पंच दश विंशति तद्व्ययं तथा॥ मुद्
२४॥ रादिना कुड्यस्याभिघाते विदारणे द्वैधीकरणे च यथाक्रमं पंचपणं दशपणं विंशतिपणश्च दंडो वेदितव्यः। अव
140 पातने पुनः कुड्यस्यैते त्रयो दंडाः समुच्चिता ग्राह्याः पुनः कुड्यसंपादनार्थं च धनं स्वामिने देयात्। अपि च
दुःखोत्पादि गृहे द्रव्यं क्षिपन् प्रहरणं तथा। षोडशाद्यः पणान्दाप्यो द्वितीयो मध्यमं दमं॥ परगृहे दुःखजनक
कंटकादिद्रव्यं प्रक्षिपन्नाद्यः षोडशपणान्दंड्यः। प्राणहरं पुनर्विषभुजंगादिकं प्रक्षिपन्मध्यमसाहसं दंड्यः। पश्वाभि

द्रोहे दंडमाह। दुःखेच शोणिते तात्पादे शाखांगछेदने तथा दंडः दश ऊपन्नानां तु द्विपणप्रवृत्तिक्रमात् दशद्रोणेपण्य
नामज्ञाविकहराणां प्रयाणेता उक्तेनेनु दुःखोत्पादनेऽअसृक्स्रावेण शाखाछेदने शाखाशब्देन च पुराणसं
चाराहितमंगादिकं लक्ष्यते। अंगानि कर चरणपुच्छ तु निशाखाचांगंच शाखांग तस्यछेदने द्विपणप्रवृत्तिदं
द्वैपणोपस्य दंडस्य सद्विपणः द्विपणः प्रवृत्तिरादिर्यस्य दंडगणस्यासौ द्विपणप्रवृत्तिः सेच दंडपणेऽ
पणः श्वनुथ्यणः च घोणेऽष्टपण इत्येवं नूपान पुनर्द्विपण द्विपणश्चतुष्पणः पंचपण इति कथमिति चेत्
उच्यते। अपराधेगरहत्वात्तावत्प्रथम दंडो द्रुतरमुपरितनं दंडत्रितयमनेगम्यते। तत्रचाष्टत्रित्वादि
संख्यात्रपणाद्दूरंकृता द्विसंख्यायाएवान्येसाम्येवाणेन गुरुत्वसंपादनिमित्ति निरवद्यं। किंच। लिंगस्यछे
दने मृतेया मध्यमोमूल्यमेव च। महापशूनामेतेषु स्थानेषु द्विगुणोदयः तेषां दशद्रूपमूनां लिंगछेसदनेम
रणेएवमध्यमसाहसोदंडः स्वामिनेच मूल्यं दद्यात् महापशूनां पनेगोगतावाडिप्रवृत्तीनामेतेषु स्थाने
षुताडनलोहितस्रावणादिनिमित्तेषु पूर्वोक्तादंडाद्विगुणोदंडोवेदितव्यः स्थावराभिद्रोहे दंडमाह।

प्ररोहि शाखिनां शाखास्कंधसर्वविदारणे। उपजीव्य द्रुमाणां च विंशतेर्द्विगुणो दमः। प्ररोहा अंकुरास्तद्वत्
शाखाप्ररोहिण्यः याश्छिन्नाः पुनरपि प्रतिकांडं प्ररोहंति ताः शाखाः येषां वटादीनां ते प्ररोहशाखिनस्तेषां शा
।५। खाछेदने पतामूलशाखा निर्गच्छति स स्कंधः तस्य छेदने समूलवृक्षछेदे च यथाक्रमं विंशतिपणाद्दंडादार
भ्य पूर्वस्मात्पूर्वस्माद्दंडादुत्तरोत्तरो द्विगुणः तदुक्तं भवति विंशतिपणाश्चत्वारिंशत्पणाशीतिपणा इत्येते
दंडा यथाक्रमं शाखाछेदनादिष्वपराधेषु भवंतीति। अप्ररोहशाखिनामप्युपजीव्यद्रुमाणां आम्रा
॥२५१॥ दीनां पूर्वेषु स्थानेषु पूर्वोक्ता दंडा एव। अनुपजीव्याप्ररोहशाखिषु पुनर्वृक्षेषु कल्प्याः। वृक्षविशेषप्रत्या
ह। चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये। जातद्रुमाणां द्विगुणो दमो वृक्षेऽपि विश्रुते। चैत्यादिषु जात
नां वृक्षाणां शाखाछेदनादिषु पूर्वोक्ता दंडा द्विगुणाः। विश्रुते च पिप्पलाशोकादिके द्विगुणो दंडः। गुल्मादी
न्प्रत्याह। गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधां। पूर्वस्मृतादर्धदंडः स्थानेषूक्तेषु कर्तने। गुल्माः अ
नतिदीर्घनिविडलतमालत्यादयः। गुच्छाश्चवाल्मकपा असद्दलप्रायाः कुरंटकादयः। क्षुपाः करवीर

द्यः सरलप्रभृतयः लता दीर्घयायिन्यो द्राक्षातिमुक्तकप्रभृतयः प्रतानाः कोंडपुरोहरिहिताः सरलपायिन्यः शिरी
षप्रभृतयः ओषध्यः फलपाकावसानाः शालिप्रभृतयः वीरुधः क्षिप्तास्वपि पापविविधं पुरोहंति गुडूचीप्रभृत
यः एतेषां पूर्वोक्तेषु विकर्त्तने छेदनादिषु पूर्वोक्ताद्दंडादर्धो दंडो वेदितव्यः इति दंडपारुष्यप्रकरणं। संप्रतं साहसं
नाम विवादपदं व्याचिख्यासुस्तल्लक्षणं तावदाह। सामान्यद्रव्यप्रसभहरणात्साहसं स्मृतं। सामान्यस्य साधार
णस्य यस्य कस्यचिद्विनियोगानर्हत्वाद्विशेषेण परकीयस्य वा हठव्यस्यापहरणं साहसं स्मृतं कुतः प्रसह्य हरण
त्प्रसह्य हरणात् बलावष्टंभेन हरणादिति यावत्। एतदुक्तं भवति। राजदंडजनाक्रोशं चोल्लंघ्य राज
पुरुषेतरजनसमक्षं यत्किंचिन्मारणपरदारधर्षणादि क्रियते तत्सर्वं साहसमिति साहसलक्षणं
अतः साधारणपरधनापहरणस्यापि बलावष्टंभेन क्रियमाणत्वात्साहसत्वमिति नारदेनापि साह
सस्य स्वरूपं विवृतं। साहसं क्रियते कर्म यत्किंचिद्बलदर्पितैः तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते

इति। तदिदं साहसं चौर्यवाग्दंडपारुष्याभ्यां संग्रहणे च व्याप्तमपि बलदर्पवशान्नोपाधितो निर्धत इति दंडातिरेकार्थं पृथग
भिधानं। तस्य च दंडवैचित्र्यप्रतिपादनार्थं प्रथमादिभेदेन त्रैविध्यमभिधाय तल्लक्षणं तेनैव विवृतं। तत्पुनस्त्रिविधं ज्ञेयं
प्रथमं मध्यमं तथा। उत्तमं चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक्। फलमूलोदकादीनां क्षेत्रोपकरणस्य च। भंगाक्षेपाव
142 मर्द्दाद्यैः प्रथमं साहसं स्मृतं। वासः पश्वन्नपानानां गृहोपकरणस्य च। एतेनैव प्रकारेण मध्यमं साहसं स्मृतं। व्याप
दो विषशस्त्राद्यैः परदाराभिमर्शनं। प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसं। तस्य दंडः क्रियापेक्षः प्रथमस्य शतावरः
मध्यमस्य तु शास्त्रज्ञैः दृष्टः पंचशतावरः। उत्तमे साहसे दंडः सहस्रावर इष्यते। वधः सर्वस्वहरणं पुरान्निर्वासनांकने। तदंगच्छे
॥१४२॥ दइत्युक्तो दंड उत्तमसाहसे इति। वधादयश्चापराधतारतम्यादुत्तमसाहसे समस्ता व्यस्ता वा योज्याः। तत्र परद्रव्या
पहरणरूपे साहसे दंडमाह। तन्मूल्याद्द्विगुणो दंडो निह्नवे च चतुर्गुणः। तस्यापहृतद्रव्यस्य मूल्यात् द्विगुणो दमः। यः पु
नः साहसं कृत्वा नाहं कर्तेति निह्नुते तस्य मूल्याच्चतुर्गुणो ~~तस्यापहृतद्रव्यस्य~~ दंडो भवति। एतस्मादेव विशेषदंडवि
धानात्प्रथमसाहसादिसामान्यदंडविधानमपहारद्रव्यव्यतिरिक्तविषयं गम्यते। साहसिकस्य प्रयोजकमपि तावत्प्र
त्याह। यः साहसं कारयति स दाप्यो द्विगुणं दमं। यश्चैवमुक्त्वाहं दाता कारयेत्स चतुर्गुणं। यस्तु साहसं कुर्वित्येवंवादी वै

वकारयत्यसौसाहसिकदंडाद्विगुणं दाप्यः यः पुनः अहं तुभ्यं धनं दास्यामीत्येवं कुर्वित्येवमुक्त्वा साहसं कारयति स च
तुर्गुणं दंडं दाप्यः अनुबंध्यादि शेयात् साहसिकविशेषमाह। आर्य्याक्रोशातिक्रमकृत् भ्रातृजायाप्रहारदः संदिष्ट
स्याप्रदाता च समुद्रगृहभेदकृत् सामंतकुलादीनामपकारस्य कारकः पंचाशत्पणिकं दंडं एषामिति विनिश्चयः आर्य्यास
ध्व्याईस्यार्यो दुराक्षेपमाज्ञातिक्रमं च यः करोति यश्च भ्रातृजायां ताडयति तथा संदिष्टस्य प्रतिश्रुतस्यार्थस्याप्र
दाता यश्च मुद्रितं गृहं भित्वा टपति तथा स्वगृहक्षेत्रादिसंसक्तगृहक्षेत्रस्वामिनां कुल्लिकानां स्वकुलादुद्भवानां
आदि ग्रहणात् स्वग्रामस्य स्वदेशीयानां च पापकर्त्ता इति सर्वे पंचाशत्पणपरिमितेन दंडेन दंड्याः॥२६॥ विंच॥ स्वच्छंद
विधवागामी विक्रुष्टेनाभिधावकः अकारणे च पि क्रोशी चांडालश्चोत्तमान्स्पृशन्॥ शूद्रः प्रव्रजितानां च दै
वपित्र्ये च भोजकः अयुक्तं शपथं कुर्वन्नयोग्ययोग्यकर्मकृत्। वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकृत्॥ तास
धारणस्यापलापी दासीगर्भविनाशकः स्वच्छंदं विधवां गच्छति चौरादिभ्यः पकृतैर्विक्रुष्टः शक्तोऽपि नाभिध
वति यश्च वृथाक्रोशं करोति। यश्चांडालो वर्णान् स्पृशति यश्च शूद्रः प्रव्रजितान् दैवपित्र्यकर्मणि भोजयति देवपि

यश्चैवं कर्मणि नोजपतिय श्वापुत्रं मातरं गच्छामीति शपथं करोति। तथा अयोग्य एवम्भूतादीर्योग्यकर्माध्याप
नादि करोति। तथा अयोग्य एवम्भूतादीर्योग्यकर्माध्ययनादि करोति। वृषोवत्नावर्द्धः क्षुद्रपशवो ज्ञाप्यः ते
143 षां पुंस्त्वस्य प्रजननशक्तेर्विनाशकः वृक्षक्षुद्रपशूनामिति पाठे हिंस्या चैषामधप्रयोगेण वृक्षोदः फलपुष्पमूल
नां पातापिता सा साधारण्यद्रव्यस्य वंचकः दासगर्भस्य पातिपिता। ये च पित्रादयोऽपतितास्तेषु वसंतः अन्यानन्यत
जंति ते सर्वे प्रत्येकं पणशतं दंड्या भवंति॥ इति साहसप्रकरणं साहसप्रसंगान्तरे शापराधेषु तेजकादीनां
दंडमाह। वसानस्त्रीन्पणान्दद्यान्नेजकस्तु परांशुकं। विक्रयावक्रयाधानयाचितेषु पणान् दशनिजको वस्त्र
१८४॥ स्य धावकः सप्तदिनेभ्यो जनार्थं समर्पितानि वासांसि स्वयमाच्छादयति तदा सोपणत्रयं दं अः पः पुनः स्त्वाधि
१८२॥ विक्रीणीते अवक्रयं वा करोति एतावत्कालमुपयोगार्थं वस्त्रं दीयते मह्यं च पुष्पमात्रं एतावद्धनं देयमिति एवं
नादके पादद्राति आधित्वं वा नयति स्वगृहे द्वौ वा पावितं ददाति असौ प्रत्यपराधं दशपणं दंड्यः तानि वस्त्राणि ण
श्लक्ष्णा शाल्मलफलके श्लक्ष्णानि पानानि निर्णेज्यानि ननव्यत्यासन यानि न च स्वगृहे वा सपित्वा नातरया दंड्यः
शाल्मलीफलके श्लक्ष्णे निर्णिज्याद्वासांसि नेजकः न च वासांसि वाससा निर्हरेन्न च वासयेदिति। मनुस्मरणात्
रण

ला। यदा पुनस्तानि प्रमादान्नाशयति तदा नारदोक्तं द्रष्टव्यं। मूल्याष्टभागो हीयेत सकृद्धौतस्य वाससः। द्विपाद
स्त्रिस्तृतीयांशश्चतुर्धौतेऽर्धमेव च। अर्धक्षयात्तु परतः पादांशापचयः क्रमात्। यावत्क्षीणदशं जीर्णं जीर्णस्यानियमः
क्षय इति। अस्यार्थः पणक्रीतस्य सकृद्धौतस्य वस्त्रस्य नाशितस्य अष्टमभागोनं सप्तपणात्मकं मूल्यं देयं। द्विर्धौतस्य तु पा
दोनं पणद्वयोनं त्रिर्धौतस्य तु पुनस्तृतीयांशान्यूनं चतुर्धौतस्यार्धं पणचतुष्टयं देयं। ततः परं प्रतिनिर्णेजनं पाद
पचयेनावशिष्टं मूल्यं देयं। यावज्जीर्णं जीर्णस्य पुनर्नाशितस्य इच्छातो मूल्यदानं। पितापुत्रविरोधे तु साक्षिणां
त्रिपणो दमः। अंतरे च तयोर्यः स्यात्तस्याप्यष्टगुणो दमः। सपणश्च विवादे पणदाने प्रातिभाव्ये भवति। अस्यैव चकारात्तत्परः कलहं व
र्धयति सोऽपि त्रिपणादष्टगुणं चतुर्विंशतिपणात्मकं दंडनीयः। दंपत्यादिष्वयमेव दंडोऽनुसरणीयः। तुलाशासनमानानां कूट
कृन्नाणकस्य च। एभिश्च व्यवहर्ता यः स दाप्यो दंडमुत्तमं। तुला तोलनदंडः। शासनं पूर्वोक्तं। मानं प्रस्थद्रोणादि। नाण
कं मुद्राचिह्नितं द्रम्मनिष्कादि। एतेषां यः कूटकृत् देशप्रसिद्धपरिमाणादल्पत्वं न्यूनत्वमाधिक्यं वा द्रम्मादेरप्यव्यव
हारिकमुद्रितत्वं वा ताम्रादिगर्भत्वं वा करोति यश्चैतैः कूटैः जानन्नपि व्यवहरति तावुभौ प्रत्येकमुत्तमसाहसं दंडनी

यै। नाणकपरीक्षिणं प्रत्याह॥ अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकं। स नाणकपरीक्षी तु दाप्य उत्तमसाहसं॥ यः पुनर्ना
णकपरीक्षी ताम्रादिगर्भमेव द्रम्मादिकं सम्यगिति ब्रूते सम्यक् चैवाकूटकमिति असावुत्तमसाहसं दंड्यः॥ चिकित्सकं
प्रत्याह॥ भिषङ्मिथ्याचरन् दाप्यस्तिर्यक्षु प्रथमं दमं। मानुषे मध्यमं राजमानुषेषूत्तमं दमं॥ यः पुनर्भिषङ्मिथ्या
आयुर्वेदानभिज्ञ एव जीवनार्थं चिकित्सितज्ञोहमिति तिर्यक्षु मनुष्यराजपुरुषेषु चिकित्सामाचरति असौ यथाक्रमं
१४४
प्रथममध्यमोत्तमसाहसं दंडनीयः। तत्रापि तिर्यगादिषु मूल्यविशेषेण धर्मविशेषेण व्याधिविशेषेण राजप्रत्या
२४५॥ सत्तिविशेषेण दंडस्य गुरुलघुभावः कल्पनीयः। अबध्यं यश्च बध्नाति बद्धं यश्च प्रमुंचति। अप्राप्तव्यवहारं च
स दाप्यो दममुत्तमं। यः पुनर्बन्धनानर्हमनपराधिनं राजाज्ञया विना बध्नाति यश्च बध्यं व्यवहारार्थमाहूतमनिव
त्तव्यवहारं चोत्सृजत्यसावुत्तमसाहसं दाप्यः। मानेन तुलया वापि योंऽशमष्टमकं हरेत्। दंडं स दाप्यो द्विशतं वृ
द्धौ हानौ च कल्पितं। यः पुनर्व्रीहिकुसुम्भकार्पासादेः पण्यस्याष्टममंशं कूटमानेन कूटतुलयान्यथा वापहरति
असौ पणानां द्विशतं दंडनीयः। अपहृतस्य पुनर्द्रव्यस्य वृद्धौ हानौ च दंडस्यापि वृद्धिर्हानिः कल्प्या॥ भेषजस्ने

हस्तवर्णगंधधान्यगुग्गुदिषु पुण्येषु प्राक्षेपन्हीनंपापान्दाप्यस्तको षोडशन्नेषडजैभावधद्रव्यं स्नेहो घृतादि वौषधद्रव्यमुशीरादि ॥ आदिशब्दे
हिंगुमरीचादि। एतेषु सारद्रव्यं विक्रयार्थे निश्चपतः षोडशपणो दंडः। किंच। मृच्चर्मणिसूत्राप: काष्ठवल्कवस्त्रादासंसं। अजातौ जातिकरणे
विक्रयाष्टगुणेणदमः। नविदितवहमूल्याजातिर्यास्मिन्मृच्चर्मादिके तदजाति तास्मिन्नजातिकरणे विक्रयार्थे गंधवर्णसंतारसेवारणेन वहुमू २
ल्यजातीयसादृश्यसंपादनेयथा मार्जिकाभोदसंचारणेन मस्त्रिकायाः सुगंधामलकमिति मार्जारचर्मणि वर्णोत्कर्षापादनेन व्याघ्रचर्मे
५गु तिस्फटिकमणौ वर्णांतरकरणेन पद्मरागइति कार्पासिके सूत्रेण उत्कर्षाधानेन पट्टसूत्रमिति। काष्ठायसे वर्णोत्कर्षाधानेन रजतमितिवि
ल्वके श्वेतचंदनामोदसंचारणेन चंदनमिति कट्टोलं त्वगारव्यंल्तवंगमिति कार्पासिके वाससि गुणोत्कर्षाधानेन कौशेयमिति विक्रेय
स्यापादितस्यादृश्यस्यमृच्चर्मादेः पणस्याष्टगुणेण दंडो वेदितव्यः। समुद्गपरिवर्त्तं च सारभांडं च कृत्रिमं। आधानं विक्रयं वापि नयतो दं
डकल्पना। हीनेपणेतु पंचाशत्पणस्तु शतमुच्यते। द्विपणे द्विशतो दंडो मूल्यवृद्धौ च वृद्धिमान्। समुद्गंपिधानमुद्गनसहवर्त्ततइति समुद्गः तं
श्चेडकं परिवर्त्तनाव्यत्यासः यो न्यदेव मुक्तानां पूर्णं करंडकं दर्शयित्वा हस्तलाघवेनान्यदेव स्फटिकानांपूर्णं करंडकं समर्पयतिय
श्च सारभांडं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रयमाधिं वा नयति तस्य दंडकल्पना वक्ष्यमाणावेदितव्यः। कृत्रिमकस्तूरिकादेर्मूल्य
भूतेपणे हीनेन्यूनेन्यूनपणमूल्य इति यावत् तस्मिन् कृत्रिमे विक्रीते पंचाशत्पणो दंडः। पणमूल्ये पुनः शतं। द्विपणमूल्ये द्विशतं दं

तुरित्येवंमूल्यवृद्धौदंडवृद्धिरूह्येय॥ वणिजःप्रत्याह॥ संभूयकुर्वतामर्घंसबाधंकारुशिल्पिनां॥ अर्घस्यह्रासंवृद्धिंवाजानतोदममुत्तमं।
राज्ञनिरूपितार्घस्यह्रासंवृद्धिंवाजानंतोपिवणिजःसंभूयमिलित्वाकारुकाणांरजकादीनांशिल्पिनांचित्रकारादीनांसबाधंपीडा
करंअर्घांतरंलाभलोभात्कुर्वंतःपणसहस्रंदंडनीयाः॥ किंच॥ संभूयवणिजांपण्यमनर्घेणोपरुंधतांविक्रीणतांवाविहितोदंडउत्त
145 मसाहसः॥ येपुनर्वणिजोमिलित्वादेशांतरादागतंपण्यमनर्घेणहीनमूल्येनप्रार्थयमानाउपरुंधयंतिमहार्घेणवाविक्रीणतेतेषा
मुत्तमसाहसोदंडोविहितोमन्वादिभिः॥ केनपुनरर्घेणपणितव्यमित्यतआह॥ राज्ञनिस्थापितोयोर्घःप्रत्यहंतेनविक्रयःक्रयोवा॥
निस्रवोस्तस्माद्वणिजांलाभकृत्स्मृतः॥ राजनिसंनिहितेसतियस्तेनार्घःस्थाप्यतेनिरूप्यतेतेनार्घेणप्रतिदिनंक्रयोवाकार्यःविक्र
योवानिर्गतःस्रवोनिस्रवोविशेषस्तस्माद्राजनिरूपितार्घाद्योनिस्रवःसएववणिजांलाभकारःनपुनःस्वछंदपरिकल्पितः
१४५॥ तमनुनावार्घकरणेविशेषोदर्शितः॥ पंचरात्रेपंचरात्रेपक्षेमासेतथागते॥ कुर्वीतचैषांप्रत्यक्षमर्घसंस्थापनंनृपइति॥ किंचस्व
देशपण्येतुशतंवणिग्गृह्णीतपंचकं॥ दशकंपारदेश्येयःसद्यःक्रयविक्रयी॥ यःस्वदेशप्राप्तंपण्यंगृहीत्वायोविक्रीणीतेअसौपंचकं
शतंपणशतेपंचकंलाभंगृह्णीयात्॥ परदेशात्पुनःप्राप्तेपण्येपण्याममूल्येदशपणंलाभंगृह्णीयात्॥ यस्यपण्यस्यग्रहणदिवसएव
विक्रयःसंपद्यते॥ यःपुनःकालांतरेविक्रयणेतेतस्यकालोत्कर्षवशाल्लाभोत्कर्षःकल्प्यः॥ एवंचयथार्घनिरूपितेपणशतेपंचप

लोनोन्नवतितथैवार्घ्योराज्ञास्वदेशपण्यविक्रयेस्थापनीयः पारदेश्यपण्यविक्रयेऽर्घोनिश्चपण्यप्रकारमाह ॥ पण्यस्योप
रिसंस्थाप्यव्ययंपण्यसमुद्भवं। अर्घोनुग्रहकृत्कार्यः क्रेतुर्विक्रेतुरेवच। देशांतरादागतेपण्ये देशांतरगमनप्रत्यागमनव्यड
रक्षणशुल्कादिस्थानेपावानुपयुक्तोर्थस्तत्त्वंतमर्घंपरिगण्यपण्यमूल्येनसहमेलयित्वायथापण्यशतेदशपणोलाभःन्नःसो
पघतेः तथाक्रेतृविक्रेत्रोरनुग्रहकार्यर्घोराज्ञास्थापनीयः प्रासंगिकंपरिसमाप्याधुना। विक्रीयासंप्रदानंप्रक्रमतेतत्स्वरू
पंनारदेनाभिहितं। विक्रीयपण्यंमूल्येनक्रेतुर्यन्नप्रदीयते विक्रीयासंप्रदानंतद्विवादपदमुच्यत इति। तत्रविक्रेयस्यद्रव्य
स्यचराचरभेदेनद्वैविध्यमभिधाय पुनः षड्विधत्वंतेनैवप्रत्यपादिलोकेस्मिन्द्विविधंपण्यंजंगमंस्थावरंतथा। षड्विध
स्यतुबुधैर्दानादानविधिःस्मृतः गणिमंतुलिमंमेयंक्रियारूपतःश्रियेति। गणिमंक्रमुकफलादि। तुलिमंकुंकुमादि। मेयंशाल्या
दि। क्रिययादोहादिरूपयापलक्षितंअश्वमहिष्यादिरूपतः पण्याङ्गनादिश्रियादीप्त्यामरकतपद्मरागादात्येतत्षड्विधंक्र
स्यमपिपण्यंविक्रीयासंप्रयच्छतोदंडमाह। गृहीतमूल्यंयःपण्यंक्रेतुर्नैवप्रयच्छति। सोदयंतस्यदाप्योसौदिग्लाभंवादिगागते। गृही
तमूल्यंपण्यंविक्रेतातत्रागृहीतमूल्यंतद्यदिविक्रेताप्रार्थ्यमानायस्वदेशवाणिजेक्रेत्रेनसमर्पयतितच्चपण्यंयदिक्रयका
लवद्यदिमूल्यंतत्सकालांतरेऽल्पमूल्येनैवलभ्यतेतदार्घह्रासकृतायः उदयोवृद्धिःपण्यस्यस्थावरजंगमात्मकस्यतेन

सहितं पण्यं विक्रेता क्रेत्रे दापनीयः। यदा मूल्यह्रासकृतः पण्यस्योदयो नास्ति किंतु अपकालेयावदेवयते मूल्यस्यपत्यायय
तिप्रतिपन्नं तावदेव तदा तत्पण्यमादाय तस्मिन्देशे विक्रयेण गतस्य योऽत्लाचस्तेनोदयेनसहितं द्विकं त्रिकं इत्यादि प्रतिप
146 दितवृद्धिरूपोदयेन वा सहितं क्रेत्रे केन वांछावशाद्दापनीयः॥ यथाह नारदः। अर्घश्चेदवहीयेत सोदयं पण्यमावहेत्।
स्थानिनामेष नियमो दिग्लाभं दिग्विचारिणामिति पदार्थः। अर्घम हत्वेन पण्यस्य न्यूनत्वावस्तदा तस्मिन्पण्ये वस्त्रगृहादि
१४६॥ के पउपभोगस्तदा छादनसुखनिवसनादिरूपो विक्रेतुः तत्सहितं पण्यमसौ दाप्यः। यथाह नारदः विक्रीय पण्यं मूल्येन
यः क्रेतुर्न प्रयच्छति। स्थावरस्य क्षयं दाप्यो जंगमस्य क्रियाफलमिति। विक्रेतुरुप भोगक्षय उच्यते। क्रेतः संबंधित्वेन
॥१४७॥ दीर्घेयमाणत्वाच्चपुनः कुड्यपातसस्यघ्नातादिरूपः। तस्य तु उपहन्यितवापण्यं दह्यतापहृियेतव विक्रेतुरेवसानेयं
विक्रीयासंप्रयच्छत इत्यग्रोक्तत्वात्। यथा त्वसौ क्रेता देशांतरात्पण्यग्रहणार्थमागतस्तदा तत्पण्यमादाय देशांतरे विक्रय
नस्य योऽत्लाचस्तेन सहितं पण्यं विक्रेता क्रेत्रे दापयितव्यः। अयं च क्रतपण्यसमर्पण नियमोऽनुशयाभावे द्रष्टव्यः। स
ति त्वनुशये क्रीत्वा विक्रीय वा किंचिदित्यादिमनूक्तं द्रष्टव्यं॥ किंच॥ विक्रीतमपि विक्रेयं पूर्वक्रेतर्यगृह्णानि। हा

निश्चेतरक्रेतरदोषेण क्रेतुरेव हि सा भवेत् । यदा पुनः सानुशयः क्रेता पण्यं न जिघृक्षति तदा विक्रीतमपि पण्यमन्यत्र विक्रे-
यं यदा पुनर्विक्रेत्रा दीयमानं क्रेता न गृह्णाति तच्च पण्यं राजदैविकेनोपहतं तदा क्रेतुरेवासौ हानिर्भवेत् । पण्यग्रहणानुरूपे-
ण क्रेतुर्दोषेणानासितत्वात् । अपि च राजदैवोपघातेन पण्ये दोषमुपागते । हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः
यदा पुनः क्रेत्रा प्रार्थ्यमानमपि पण्यं विक्रेता न समर्पयत्यजातानुशयो पितच्च राजदैविकेनोपहतं भवति तदा हानिर्वि-
क्रेतुरेवोच्यते । न्यादुष्टपण्यविनिक्षसहसंक्रेगेदर्पं विच । अन्यहस्ते च विक्रीतं क्रीणाति स दोषं वा पण्यं प्रच्छादितदो-
षं विक्रीणाति तदा तत्पण्यमूल्याद्द्विगुणं वा दुष्टं वा दुष्टवद्यदि । विक्रीणाति दमस्तत्र मूल्यात्तु द्विगुणो भवेत् यः पुनर्विनैवानुश-
यमेकस्य हस्ते विक्रीतं पुनरन्यस्य हस्ते विक्रीणाति स दोषं वा पण्यं प्रच्छादितदोषं विक्रीणाति तदा तत्पण्यमूल्याद्द्विगुणो
दमो वेदितव्यः नारदेनापि विशेषो दर्शितः । अन्यहस्ते तु विक्रीय योन्यस्मै तत्प्रयच्छति द्रव्यं तद्द्विगुणं दाप्यो विनयं ताव-
देव तु । निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति । समूल्याद्द्विगुणं दाप्यो विनयं तावदेव त्विति सर्वश्चायं विधिर्दत्तमूल्ये पण्ये
द्रष्टव्यः अदत्तमूल्ये वाऽञ्जनक्रये क्रेतृविक्रेत्रोर्नियमकारिणः समयादन्ये प्रवृत्तो नित्वतावान कश्चिद्दोषः । यथाह नारदः

दत्तमूल्यस्यपण्यस्यविधिरेषःप्रकीर्तितः।अदत्तेन्यत्रसमयान्नविक्रेतुरतिक्रमयइति।विक्रयानुशये।निहितःक्री
तानुशयस्वरूपंप्रकृप्रपचितमधुनातदनपसाधारणंधर्ममाह।।क्षयंवृद्धिंचवणिग्जापण्यानामविजानता।।क्रीत्वा
ना नानुशयःकार्यःकुर्वन्षड्भागदंडभाक्।।परीक्षितंक्रीतपण्यानांक्रयान्तरकालंक्रयकालतोपरिमाणितोर्घक्षतांवृद्धिमपश्यताक्री
तानुशयोनकार्यः।विक्रेतृचमहार्घनिबंधनंपण्यक्षयमपश्यतानानुशयितव्यं।वृद्धिक्षयपरिज्ञानेपुनःक्रेतुर्विक्रेतुरनुश
१४७॥ योन्नभवतीतिव्यतिरेकादुक्तंभवति।अनुशयकालावधिश्चनारदेनोक्तः।क्रीत्वामूल्येनयःपण्यंदुष्क्रीतंमन्यतेक्रयी।विक्रेतुः ॥१
॥१४८॥ प्रतिदेयंतत्तस्मिन्नेवाह्न्यविक्षतं।द्वितीयेह्निददत्क्रेतामूल्यात्त्रिंशांशमाहरेत्।द्विगुणंतृतीयेह्निपरतःक्रेतुरेवतदितिअपरीक्षितद्र
पविषयेपुनःपण्यवर्गापेक्षयानुशयावधिःदशैकपंचसप्ताहमासत्र्यहार्धमासिकमित्यादिनादर्शितमेवातदन
पायिपण्यवृद्धिक्षयपरिज्ञानस्यानुशयकारणत्वमवगम्यते।यथापण्यपरीक्षाविधिबलात्पण्यदोषाणामतःपण्यदो
षता।वृद्धिक्षयकारणात्रितयाभावेनुशयकालाभ्यंतरेपियःअनुशयंकरोतितदापण्यषड्भागदंडन्यायः।अनुशयका
रणसद्भावेप्यनुशयकालातिक्रमेणानुशयंकुर्वतोऽप्येवदंडः।उपभोगेनाविनष्टरेषुस्थिरार्घेष्वनुशयव

त्रि ष

ल्लातिक्रमेणानुशयं कुर्वतो मनुक्तो दंडो दातव्यः। परेण तु दशाहस्य न दद्यान्नापि दापयेत्। आददानो ददच्चैव राज्ञा दंड्यः शतानि षट्
इति॥ इति विक्रीयासंप्रदानं नाम प्रकरणं॥ संभूयसमुत्थानं नाम विवादपदमिदानीमभिदधाति॥ समवायेन वणिजां लाभार्थं
कर्म कुर्वतां। लाभेनालाभेनैव यथा द्रव्यं पयाया संविदा कृतौ सर्वं वपूमिदं कर्म मिलिताः कुर्मह इत्येवं नृपासं प्रतिपत्तिः समवायस्तेन ये
वणिजो नर्तकप्रभृतयो लाभेनालिसवो भूत्वा प्रतिस्विकं कर्म कुर्वते तेषां लाभालाभौ वृपे च पाप येयोयथा द्रव्यं येन यावद्धनं पणपणं गृहे
णार्थं दत्तं तदनुसारेणैव स्यौ। पद्धा प्रधनगुणाभावपर्यालोचनपाज्ञस्य भागाद्धूपमस्यैको भाग इत्येवं नृपयासं विदा समयेन यः
संप्रतिपन्नैतयावेदत्तव्यं। किंच। प्रतिषिद्धमनादिष्टं प्रमदाघच्चनाशितं। सत द्द्याद्धिप्लवाच्चरी सितादशमांशभाकृ। तेषां संभूयप्रच
रतां मध्ये पाणप मिदमिलुनव्य वहर्त्तव्यमिति निषिद्धमाचर [illegible] तायन्नाशितं ज्ञनादिष्टमननुग्यानं वा कुर्वाणेपेन तथा प्रमादेन
प्रज्ञाहीनतयावायेनयन्नाशितं स तत्यापं वणिग्भ्यो दद्यात्। यत्पुनस्तेषां मध्ये चौरराजादिजनिताद्भुसनाद्यापायपालपातिस
तस्माद्रक्षितातात्दशमांशं सलभेत्। अर्घप्रक्षेपणापविंशं भागा मुल्कं नृपोहरेत्। व्यासिद्धं राजयोग्यं च विक्रीतं राजगामितत्। इय
तः पापस्येदं मूल्यमित्यर्घप्रक्षेपणापद्रव्याऊनि नृपाणां हेतोरसौ मूल्याद्विंसतितमं भागं मुल्कार्थं गृह्नीयात्। यत्पुनर्व्यासिद्धमत्र चका
विक्रेयमिति राज्ञा प्रतिषिद्धं पद्यराजयोग्यं माणिक्यादिकं प्रतिषिद्धमपि तद्राज्ञा च्यनिवेद्य लाभेनैतौ विक्री

तंचेद्राद्गगामिमूल्यदाननिरपेक्षंतत्सर्वंपण्यंराजापहरेदित्यर्थः॥मिथ्यावदन्परिमाणंमुल्कास्थानादपाक्रमन्दश।दण्यस्तद्गु
णपण्यसव्याजक्रयविक्रयिः।पुनर्वणिक्‌मुल्कपंचनार्थंपण्यपरिमाणंनिन्हुतेमुल्कग्रहणस्थानाद्वापसरतिपण्यस्यमस्य
१४४ वादृत्येवंविवादास्पदीभूतपण्यंक्रयणातिविक्रयणतेवातेसर्वंपण्यादष्टगुणंदंडनीयः॥अपिच।तरिकःस्थलजंमुल्कंगृह्ण
न्दाप्यःपणान्दश।ब्राह्मणप्रातिवेश्यानामेतदेवनिमंत्रणे॥मुल्कंहि द्विविधंस्थलजंजलजंचतत्रस्थलजमर्घप्रक्षेपणी
द्विशं भागंमुल्कंनृपोहरेदित्यत्रोक्तं।जलजंतुमानवेनिहितं।पणंयानंतरेदाप्यंपुरुषोर्धपणंतरे।पादंपशुश्चयोषिच्च
१४८। पादार्धंरिक्तकःपुमानिच्चांडपूर्णानिपानानितार्यंदाप्यानिसारतारिक्तभांडानिपाल्किंचित्प्रमाण्यपरिक्छदादिति।मुल्कंद
देप्यरोविशेषः।नचिनकार्षापणमस्तिमुल्केनस्तित्स्यवचनेनशिशौनदूते।नतैत्स्यलक्षेनदूतावसेषेनश्रोत्रियेपप्रव
१८ ड़ितेनयज्ञइतितीर्थतिः।अनेनेतरिःनवादिस्तदुत्पन्नमुल्कोधिकृतस्तरिकःसपदिस्थलजंद्रव्यंमुल्कंगृह्णातितदादशपणान् ग
दंडनीयः।वेशावेश्मप्रतिवेशइतिस्वविस्मानिमुखवेश्मवेश्मपार्श्वस्थेचोच्यतेतत्रनिवासप्रतिवेश्यः।ब्राह्मणास्वतेप्रा
तिवेश्यास्चब्राह्मणाप्रातिवेश्यास्तेषांश्रुतवृत्तसंपन्नानामाश्रादादिषुविजनवेसायनिमंत्रणेएतदेवदशपणात्मदंडमं

वेदितव्यं। देशांतरमृतवणिक्कुरिक्थप्रत्याह। देशांतरमृते प्रेते द्रव्यं दायादबांधवाः ज्ञातयो वा हरेयुस्तदागतास्तैर्विनान्नृपः पादसंन्नूय
कारिणां मध्येयः कश्चिद्देशांतरं गतो मृतस्तद्दायं दायादाः पुत्राद्यपत्यवर्गाः बांधवा मातृपक्षो मातुलाद्याः ज्ञातयोपत्यवर्गव्यति
रिक्ताः सपिंडा वा आगताः संन्नूयव्यवहारिणः प्रदेशांतरादागतास्तैर्विना गृह्णीयुः तैर्विना दायादाद्यभावे राजा गृह्णीयात् वायादे
च दायादबांधवादीनां वैकल्पिकमधिकारं दर्शयति पौर्वापर्यनियमस्तु पत्नी दुहितरइत्यादि प्रतिपादितएव अत्रापि विज्ञे
यः शिष्यसब्रह्मचारिवाक्यानां निषेधो वणिक्प्रातिस्विकवचनप्रत्यायनं वणिजां मध्ये यः पिंडदानोदकदानादिसमर्थः
स गृह्णीयात् तत्सामर्थ्याविशेषेः पुनः सर्वे वणिजः संसृष्टिनः सर्ववणिजो विभज्य गृह्णीयुः तेषामप्यभावे दशवर्षं दायादाद्
आगमनं प्रतीक्ष्यानागतेषु राजा स्वयमेव गृह्णीयात् तदिदं नारदस्य वचनमुक्तं। एकस्य चेत्स्यान्मरणं दायादोस्य तदाप्नुयात्। अ
न्यावा सति दायादे शक्ताः स्युः सर्व एव ते। तदभावे न गुप्तं तत्कारयेद्दशवत्सरान्। अस्वामिकमदायादं दशवर्षं स्थितं ततः
राजा तदात्मसात्कुर्यादेवं धर्मो न हीयते इति। विंचाडिशुल्कत्यजपुर्निर्लोभात्मा मृशक्ता अन्येन कारयेत्। डिह्नमिव चक्रः तोनेलो न्न
निर्गतत्वाच्चंत्वाच्चमात्रि धत्यजेपुर्वहिःकुर्युः पश्चात्संन्नूयकारिणां मध्ये ज्ञाड्प्रत्यवेक्षणादिकर्तुमसमर्थः अ[illegible]नै

नत्वकं कर्म नंड नार वहनेतदापव्ययपरी क्षणादिकं कारयेत प्रागुपदिष्ट वर्णिक धर्मम त्विगादिक्वतिदिशति। अने
नविधिराख्यातदित्विग्धर्मक कर्माणि। अनेन नत्वा न्वाला चैतापर्या दृव्यमित्यादि वर्णिग्धर्मकथनेन सत्विज्ञां हाव।
दनां क्षय वेडानां नरत्ने क्तकत क्षादनां वरिष्ठत्व कर्मापङ्गा विनां च विधिर्वर्त्तनप्रकारश्चाख्यात स्तत्र स्त्विज्ञा
१५१ धनकिनागविशेषामनुनादर्शितः। सर्वेषामर्द्धिनां मुख्यास्तदर्धेनार्धिनापरे। ततीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः।
ति। अस्यापमर्थः। ज्योतिष्टोमे तरातेन दाक्षपेतातेति वचनेन गवां शतमत्विग्भ्यानतिन्नूपे दक्षिणा कार्ये विनियुक्तं सत्वि
॥१४९॥ जमहोताद्रयः षोडशात त्रकियानंश इत्यपेक्षापामिदमुच्यते। सर्वेषां होत्रादीनां षोडशर्त्विजां मध्ये ये मुख्याश्च
त्वारो होताध्वर्युब्रह्मोद्गातारः ते गोशतस्यार्द्धिनः सर्वेषां नागपरिपूरणेणपपत्तिवशायाताष्टाचत्वारिंशदूपार्द्धिनः।
र्द्धनाजः अपरे मैत्रावरुण प्रतिप्रस्थाता ब्राह्मणाच्छंसिप्रस्तोतारस्तदर्धेन तस्य मुख्यांशस्यार्द्धिन चतुर्विंशतिरू
पाणि धर्मभाजः ये पुनस्तृतीयेना ऽच्छावाक नेष्टाग्नीध्रप्रतिहर्त्तारस्ते तत्तीयिनो मुख्यांशस्य षोडशागानूपतृतीयांशेन तृ
तीयांशेनततीयांशभाजः पेतु पादिनो ग्रावस्तुदुन्नेतृसुब्रह्मण्यापोतारस्ते मुख्यनागस्य पञ्चतुर्थांशो द्वादशगानूपस्तद्भाजः न

नुक्रमप्रमंशनियमोप्यत्र तेन तावदत्र समवायः नापि द्रव्यसमवायः नापि वचनं पद्धशां दानानियमः स्यात् अतः समस्य
दश्रुतित्वादित्रिन्यायेन सर्वेषां सन्यांशग्ना क्रमेणानुरूपेण वा समाख्यामिति युक्तं। अत्रोच्यते। ज्योतिष्टोमप्रकृतिके ध्व
दशाहेऽर्धिनस्तृतीयिनः पादिन इति सिद्धवदनुवादान्न घटते परिदत्तप्रकृतिन्नु तेऽपाति ष्टोमे अर्ध्वतीयचतुर्थांश
भाक्त्वं मैत्रावरुणादीनां न स्यात्। अतो वैदिकार्धपुन्नतिसमाख्याबलात् प्रागुक्तांशनियमो वकल्प्यत इति निरवद्यं॥ ॥इ
ति संसृष्टविभागप्रकरणं॥ इदानीं स्तेयं प्रस्तूयते। तल्लक्षणं च मनुनाभिहितं स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृ
तं। निरन्वयं भवेत्स्तेयं कृत्वापव्ययते च यदिति। अन्वयवद्द्रव्यस्वामिराजाध्यक्षादिसमक्षं प्रसह्य बलावष्टंभेन यत्परधन
हरणादिकं क्रियते तत्साहसं स्तेयं तु तद्विलक्षणं निरन्वयं द्रव्यस्वाम्याद्यसमक्षं वंचयित्वा यत्परधनहरणं तदुच्यते। प
श्चसान्वयमपि कृत्वा न मयेदं कृतमिति भयान्निन्हुते तदपि स्तेयं नारदेनाप्युक्तं। उपायैर्विविधैरेषां छलयित्वापकर्ष
णं। सुप्तमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनीषिण इति। तत्र तस्करग्रहणपूर्वकत्वाद्दंडस्य ग्रहणस्य च ज्ञानपूर्वकत्वात् ज्ञा
नोपायं तावदाह। ग्राहकैर्गृह्यते चौरो लोप्त्रेणाथ पदेन वा। पूर्वकर्मापराधी च तथा चाशुद्धवासकः। पम्बेर इति जनैर्विख्य

प्यते असौ ग्राह्यकै राजपुरुषैः स्थानपालपुरस्सरैर्निगृहीतव्यः लोप्त्रेण प्रहतत्ताडनादिना वा चौर्यप्रविष्टेन वा नाशदेशा
दारन्यः चौरपदानुसरणेन वा ग्राह्यः। पश्चपूर्वकर्मापराधी प्राक्ख्यातचौर्यः अशुद्धः प्रज्ञातावासः स्थानं यस्यासौ च
150 शुद्धवासकः सोऽपि ग्राह्यः। किंच। अन्येऽपि शंकया ग्राह्याः ज्ञातिनामादिनिह्नवैः द्यूतस्त्रीपानसक्ताः शुष्कभिन्नमुखस्वराः प
रद्रव्यगृहाणां च प्रष्टारो गूढचारिणः निरायव्ययवन्तश्च विनष्टद्रव्यविक्रयाः न केवलं पूर्वोक्ता ग्राह्याः किंत्वन्येऽपि वक्ष्यमा
णैर्लिंगैः शंकया ग्राह्याः ज्ञातिनिह्नवेन नाहमस्य शूद्र इति एवं रूपेण नामनिह्नवेन नाहं ... इत्येवं रूपेण आदिग्रहणेन
॥१५०॥ स्वदेशग्रामकुलाद्यपलापेन च लक्षिता ग्राह्याः। द्यूतपण्यांगनामद्यपानादिव्यसनेष्वतिप्रसक्ततया कृतस्त्यासित
मिति चौरग्राहिभिः पृष्टाः पदि शुष्कमुखा भिन्नस्वरा वा भवंति तदा ह्यसावपि ग्राह्यः। बहुवचनात् खिन्नललाटादीनां ग्रहणं तथा पे
निष्कारणं कंचन किं पदस्य धनं किं वा गृहमित्येवं पृच्छति वेषांतरधारणेनात्मनं गूहयित्वा पे चरंति पे वा आयाज्ञा वापि व्ययप
कारिणः पे वा विनष्टद्रव्याणां जीर्णवास्त्राभिन्नभाजनादीनामज्ञातस्वामिकानां विक्रयकारकास्ते सर्वे चौर्यसंभावनया
ग्राह्याः एवं नानाविधचौरस्यापि लोप्त्रादि चौर्यलिंगसंबंधसंभवात्। यथाह नारदः। अन्यहस्तात्परिभ्रष्टमका

मादुष्टितं न्नृवि। चौरेण वा प्रतिक्षिप्तं लोप्त्रं यन्नात्परीक्षयेत्। तथा। असत्याः सत्यसंकाशाः सत्याश्चासत्यसन्निभाः। दृश्यन्ते विविधा न
वास्तस्माद्युक्तं परीक्षणमिति। एवं चौर्यशंकया गृहीतेनात्मा शोधनीय इत्याह। गृहीतः शंकया चौर्ये नात्मानं चेद्विशो। धयेत्। दापयि
त्वा हृतं द्रव्यं चौरदंडेन दंडयेत्। यदि चौर्यशंकया गृहीतस्तन्निराकरणार्थमात्मानं न शो। धयेत् तर्हि वक्ष्यमाणं धनदापनवधादिदंड
न्नार्हः। ननु वदतो मानुषेण तदन्नावेदिव्येन वात्मा शो। धनीयः। ननु नाहं चौर इति मिथ्योत्तरकथं प्रमाणं संभवति तस्याभावानुपपत्त्वात्। उच्य
ते। दिव्यस्य तावद् द्वावाभावे गोचरत्वं सत्यावान्यतरः कुर्यादित्य न्न प्रतिपादितं मानुषं पुनर्यद्यपि साक्षाद्धि मिथ्योत्तरेण न संभवति तथा
पि कारणं संसर्गे त्वभावरूपमिथ्याकारणसाधनमुखेनाभावमपि गोचरयत्येव। अपर्याप्तनाशापहारकालेऽहं देशान्तरस्थ इत्यपलब्धिपुरुषो जावि
ते चौर्याभावस्याप्यर्थात् सिद्धेः शुद्धिर्भवत्येव। चौरदंडमाह। चौरं प्रदाप्यापहृतं घातयेद्विविधैर्वधैः। परस्वप्राग्रूपपरीक्षया तन्नि
रपेक्षं वा निश्चितचौर्यस्तं स्वामिनेऽपहृतधनं स्वरूपेण मूल्यकल्पनया वा दापयित्वा विविधैर्वधैर्घातयेत्। एतच्चोत्तमसाहसदंड।
प्राप्तियोग्योत्तमद्रव्यविषयं न पुनः पुष्पवस्त्रादिक्षुद्रमध्यमद्रव्यापहारविषयं। साहसेषु य एवोक्तस्त्रिषु दंडो मनीषिभिः। स एव दं
डस्तेयेपि द्रव्येषु त्रिष्वपि क्रमादिति नारदवचनेपि च घरूपस्योत्तमसाहसस्योत्तमद्रव्यविषये व्यवस्थापितत्वात्। यत्पुनर्दंड
मनुवचनं। अन्यायोपात्तवित्तत्वाद्धनमेषां मलात्मकं। अतस्तान्घातयेद्राजा नार्थदंडेन दंडयेदिति तदपि महापराधविषयं॥

चौरविशेषेष्वपवादमाह॥ सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत्। ब्राह्मणं पुनश्चौरं महत्यप्यपराधे न घातयेत्। अपितु ल
लाटे ऽङ्कयित्वा स्वदेशान्निर्वासयेत्। अंकनं च श्वपदाकारं कार्यं। तथा च मनुः। गुरुतल्पे भगः कार्यः। सुरापाने सुराध्वजः। स्तेये च श्वप
15 दं कार्यं ब्रह्महण्यशिराः पुमानिति। एतच्च दंडोत्तरकालं प्रायश्चित्तमचिकीर्षतां द्रष्टव्यं। यथाह मनुः। प्रायश्चित्तं तु कुर्वाणाः पूर्वे व
र्णा यथोदितं। नांक्या राज्ञा ललाटे तु दाप्यास्तूत्तमसाहसमिति। चौरादर्शने ऽपहृतद्रव्यप्राप्त्युपायमाह॥ घातितेऽपहृते दोषो ग्राम
भर्तुरनिर्गते। विवीते भर्तुस्तु पथि चौरोद्धर्तुरवीतके॥ पादे ग्रामे मध्ये मनुष्यादिप्राणिवधो धनापहारो वा जायते तदा ग्रामपते
॥१५२॥ रेव चौरोपेक्षादोषः अतस्तत्परिहारार्थं स एव चौरं गृहीत्वा राज्ञे समर्पयेत्। तदशक्तो ऽपहृतं धनं धनिने दद्यात्। पदं चौरपदं स्व
ग्रामे न्निर्गतं न दर्शयति दर्शितं पुनस्तत्पदं यत्र प्रविशति तद्विषयाधिपतिरेव चौरं धनं वार्पयेत्। तथा च नारदः। गोचरे यस्य ॥१
मुष्येत तेन चौरः प्रयत्नतः। ग्राह्यो दाप्योऽथवा शेषं पदं यदि न निर्गतं। निर्गते पुनरेतस्मान्न वेदन्यत्र पातितं। सामंतान्मार्गपालांश्च
दिक्पालांश्चैव दापयेदिति विवीते त्वपहारे विवीतस्वामिन एव दोषः पदात्ययेत ध्वते न भवति विवीतके वा विवीतादन्यत्र यस्
त्वेतदा चौरोद्धर्तुर्मार्गपालस्य दिक्पालस्य वापराधः। किंच। स्वसीम्नि दद्याद्ग्रामस्तु पदं वा यत्र गच्छति। पंचग्रामी बहिः क्रो
शाद्दशग्राम्यथवा पुनः। यदा पुनर्ग्रामाद्बहिः सीमापर्यंते वसे ग्रेमाबादिकं भवति तदा तद्ग्रामवासिन एव दद्युः। पदि सीम्नो बहि

श्चोरपदंननिर्गतंनिर्गतेपुनर्पदेग्रामादिकेचौरपदंप्रविशतिसएवचौरार्पणादिकंकुर्यात्।पदात्वनेकग्राममध्येक्रोशमात्राद्बहिःप्रदे
शेघातितामुषितावाचौरपदस्यजनसंमर्दादिनानष्टंतदापंचानांग्रामाणांसमाहारःपंचग्रामीदशग्रामसमाहारोवादद्यात्।वि
कल्पवचनंतुयथाप्रत्यासत्त्यपहृतधनप्रत्यर्पणादिकंकुर्यादित्येवमर्थं।यदात्वनेतोपहृतंधनंदापयितुंनशक्नोतितदास्वको
शादेवराज्ञादद्यात्।चौरहृतमविजित्ययथास्थानंगमयेत्स्वकोशाद्वादितिगौतमस्मरणात्।मुषितामुषितसंदेहमानुषेणवादि
व्येनवानिर्णीयकार्यः।यदितस्मिन्दाप्यमानेनैवंमोषसंशयःमुषितंशपथंदाप्योवंचकोन्निर्वासोपिदासौघ्नेदितिवृद्धमनुस्मरणा
त्।अपराधविशेषेदंडविशेषमाह।बंदिग्राहांस्तथावाजिकुंजराणांचहारिणः।प्रसह्यघातिनश्चैवशूलानारोपयेन्नरान्।बंदि
ग्राहादीन्बलावष्टंभेनघातकांश्चनरान्शूलानारोपयेत्।अयंचवधप्रकारविशेषोपदेशः।अन्नगारायुधागारदेवतागारभेदका
न्।हस्त्यश्वरथहर्तॄंश्चहन्यादेवाविचारयन्निति।मनुस्मरणात्।किंच।उत्क्षेपग्रंथिभेदौचकरसंदंशहीनकौ।कार्यौद्वितीयापराधेक
रपादैकहीनकौ।वस्त्राद्युत्क्षिप्यापहरतीत्युत्क्षेपकः।वस्त्रादिबद्धंसुवर्णादिकंविस्रस्यात्मसात्कृत्यवापहरतिअसौग्रंथिभेदकः।तौयथा
क्रमंकरेणसंदंशसदृशेनतर्जन्यंगुष्ठेनचहीनौकार्यौ।द्वितीयापराधेपुनःकरश्चपादश्चकरपादंतच्चतदेकंचकरपादैकंतद्धीनंप

योऽस्तौ वस्त्रपादैक्यहीनं कौ कार्यौ उक्षेपयत्यंघ्रि च्छेदयोरेकमेकंकरं पादं च छिंद्यादित्यर्थः एतदप्युत्तमसाहसप्राप्तियोग्यद्रव्यविषयं तदं
गच्छेदइत्यक्तो दंड उत्तमसाहस इति नारदस्मरणात् तृतीयापराधेव धएवात्तयाच मनुः । अंगुल्या ग्रंथिभेदस्य छेदयेत्प्रथमे
152 व्यहे द्वितीये हस्तचरणौ तृतीये वधमर्हतीति । जातिद्रव्यपरिमाणपरिग्रहविनियोगवयः शक्तिगुणदेशकालादीनां दंडगुरुत्व
घुत्वावकारणानां सानंत्यात्प्रति द्रव्यवक्तुमशक्तेः सामान्येन दंडकल्पनोपायमाह । क्षुद्रमध्यमहाद्रव्यहरणे सारतो दमः देश
कालवयःशक्तिसंचिंत्य दंडकर्मणि । क्षुद्राणां मध्यमानामुत्तमानां च द्रव्याणां हरणे सारतो मूल्याद्यनुसारतो दंडः कल्पनीय
क्षुद्रादिद्रव्यस्वरूपं च नारदेनोक्तं । मद्भांडासनखट्वास्थिदारुचर्मतृणादियत् । शमीधान्यं कृतान्नं च क्षुद्रं द्रव्यमुदाहृतं । वास
॥१५२॥ कौशेयवर्जं च गोवर्जं पशवस्तथा । हिरण्यवर्जं लोहं च मध्यं व्रीहियवा अपि । हिरण्यरत्नकौशेयस्त्रीपुंगोगजवाजिनः देवब्राह्म
णराज्ञां च द्रव्यं विज्ञेयमुत्तमं त्रिप्रकारेष्वपि द्रव्येष्वौत्सर्गिकः प्रथममध्यमोत्तमसाहसरूपो दंड नियमस्तेनैव दर्शितः साहसेषु
यएवोक्तो त्रिषु दंडो मनीषिभिः स एव दंडः स्तेयेपि त्रिषु द्रव्येष्वनुक्रमादिति । मन्मपेषु मणिक्केमल्लिकादिषु गोव्यतिरिक्तेषु
च महिषमेषादिपशुषु ब्राह्मणसंबंधिषु च कतकधान्यादिषु तरतमभावोस्तीत्यतश्चावच दंडविशेषाकांक्षायां मूल्याद्यनु नु
सारेण दंडः कल्पनीयः तत्र च दंडकर्मणि दंडकल्पनायां तदनुभूतं देशकालवयःशक्तिसम्यक्चिंतनीयं एतच्च द्वंद्वमिद्रव्य

रिमाणपरिग्रहादीनामुपलक्षणं। तथा अब्राप्याद्यंस्तेपकिल्बिषंशूद्रस्यद्विगुणेतरांणिइतरेषांपुनर्विदुषोतिक्रमेदं
डन्नूपस्त्वमिति। अयमर्थः किल्बिषशब्देनात्र दंडोलक्षते पस्मिंन्नपहारेयो दंडो राज्ञः सविहद्रादिकर्त्रकेऽपहारेज्ञ
णंआपादनीयः यस्माद्विद्द्रादिकर्त्रकेऽपहारे दंडन्नूयस्त्वं। मनुनाप्ययमेवार्थोदर्शितः अब्राप्याद्यंतुशूद्रस्यस्तेपन्नवति
किल्बिषं। षोडशैवतुवैश्यस्य। द्वात्रिंशतक्षत्रियस्यच ब्राह्मणस्यचतःषष्टिपूर्णंवापिशतंन्नवेत्। द्विगुणावाचतुःषष्टिस्तद्दो
षगुणविदिति इतितथापरिमाणकृतमपिदंडगुरुत्वंदृश्यते। यथाहमनुः। धान्यंदशन्यःकुंन्येन्यो हरतोभ्यधिकंवधः। शेषेप्ये
कादशगुणंदाप्यस्तस्यचतद्धनमिति विंशतिद्रोणकुंन्तः हरत्रियमाणस्वामिगुणपदेनपासुन्निदोर्दत्ते कालापेक्षया।
वाताडनांगछेदनवधरूपादंडायोज्याः तथासरव्याविशेषादपि दंडविशेषः आदिषुसवर्णरजतादीनामुत्तमानांचवाससे
रत्नानांचैवसर्वेषांशताद्भ्यधिकेवधः पंचाशतस्त्वन्यधिके हस्तछेदनमिष्यते शेषेत्वेकादशगुणंमूल्याद्दंडप्रकल्पयेत्
दितितथाद्रव्यविशेषादपि पुरुषाणांकुलीनानांनारीणांचविशेषतः रत्नानांचैवसर्वेषांहरणेवधमर्हतिःअकुलीनानां
तुदंडांतरं पुरुषंहरतोदंडउत्तमसाहसः स्यपहारेतुसर्वस्वंकन्यांतुहरतोवध इति। क्षुद्रद्रव्याणांतुमाषकान्मूनमू
ल्यात्पंचगुणोदंडः काष्ठन्नांडतृणादीनांमृन्मयानांतथैवच। वेणुवैणवन्नांडानांतथास्नाय्वस्थिचर्मणां। शाकानामार्द्र

मूल्यानां हरणे फलमूल्येया। गोरसेक्षुविकाराणां तथा लवणतैलयोः पक्वान्नानां कृतान्नानां मत्स्यानामामिषस्य च। सर्वेषामल्पमू
ल्यानां मूल्यात्पंचगुणो दम इति नारदस्मरणात्। यः पुनः प्रथमसाहसः क्षुद्रद्रव्येषु शतावरः पंचशतपर्यंतो सो माषमूल्ये तदधिकमू
ल्ये च यथायोग्यं व्यवस्थापनीयः। यत्पुनर्मानवं क्षुद्रद्रव्यगोचरं वचनं तन्मूल्याद्द्विगुणो दम इति तदल्पप्रयोजनशरावादिविषयं तथाप
153 राधगुरुत्वादपि दंडगुरुत्वं यथा। संधिं भित्वा तु ये चौर्यं रात्रौ कुर्वंति तस्कराः। तेषां छित्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयेदित्येवं स
र्वेषां मानत्वात्प्रतिद्रव्यं वक्तुमशक्यत्वाज्जातिपरिमाणादिनिःकारणे दंडे गुरुलघुभावः कल्पनीयः। पथिकानां पुनरल्पापहारेन दंडः
यथाह मनुः। द्विजोध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके। आददानः परक्षेत्रान्न दंडं दातुमर्हतीति। तथा। चणकव्रीहिगोधूमयव
॥२५३॥ नां मुद्गमाषयोः। अनिषिद्धैर्ग्रहीतव्यो मुष्टिरेकः पथि स्थितैः। तथैव सप्तमे भक्ते भक्तान्यनिषडनभ्रता। अश्वस्तनविधानेन हर्तव्यं हा
हीनकर्मण इति। अचौरस्यापि चौरोपकारिणो दंडमाह॥ भक्तावकाशाग्न्युदकमंत्रोपकरणव्ययान्। दत्वा चोरस्य वा हंतुर्जानतो
दम उत्तमः। भक्तमन्नं। अवकाशो निवासस्थानं। अग्निश्चौरस्य शीतापनोदार्थः। उदकं रक्षितस्य मंत्रश्चौर्यप्रकारोपदेशः। उ
पकरणं चौर्यसाधनं। व्ययः अपहारार्थं देशांतरं गच्छतः पाथेयं। एतानि चौरस्य हंतुर्वा दद्व्यत्वे जानन्नपि यः प्रयच्छति तस्योत्तमसाह
सो दंडः। चौरोपेक्षिणामपि दोषः। शक्ता ह्युपनुपेक्षंते तेपि तद्दोषभागिन इति नारदस्मरणात्। किंच। शस्त्रावपाते गर्भस्य पातने चोत्त

न्त

मोदमः ॥ उत्तमो वा ऽधमो वापि पुरुषस्त्रीप्रमापणे। परगात्रे पुरुषस्य स्यादवपातने दासी ब्राह्मणगर्भव्यतिरेकेण गर्भस्य पातने दो
त्तमोदमः। दासीगर्भनिपातने तु दासीगर्भविनाशाच्छतिदत्यादिना स्वनदं डोऽभिहितः ब्राह्मणगर्भे तु हत्वा गर्भमविज्ञातमित्यत्र ब्रह्म
हत्यातिदेशं वक्ष्यति। पुरुषस्य स्त्रियो विस्त्रीप्रमापणे शीलवृत्ताद्यपेक्षयोत्तमो वाधमो वा दंडो व्यवस्थितो वेदितव्यः। अपि च प्रदुष्टां स्त्रि
यं चैव पुरुषघ्नीमगर्भिणीं। सेतुभेदकरीं वा सु शिलां बद्ध्वा प्रवेशयेत्। विषेण दुष्टा विप्रदुष्टा भ्रूणघ्नी स्वगर्भपातिनी च। पापा च पु
रुषहंत्री। सेतूनां भेत्री च। एता गर्भरहिता स्त्री गले शिलां बद्ध्वा अप्सु प्रवेशयेत्। यथा न प्लवेते। किं च। विषाग्निदां पतिगुरुनिजाप
त्यप्रमापणीं। विकर्णकरनासोष्ठीं कृत्वा गोभिः प्रमापयेत्। अगर्भिणीमित्यनुवर्तते। पाप एव चार्थं भक्तपानादिषु विषं दद
ति क्षिपति या च दाहार्थं ग्रामादिष्वग्निं तया च पापा च निजपतिगुरुर्वापत्यानि मारयति तां छिन्नकर्णकरनासोष्ठीं कृत्वा अदांतैर्दुष्टब
लीवर्दैः प्रवाह्य मारयेत्। स्तेयप्रकरणेऽप्यदे तत्साहसिकस्य दंडविधानं तत्प्रासंगिकमिति मंतव्यं। अविज्ञातकर्तृके हनने हंतृ
ज्ञानोपायमाह॥ अविज्ञातहतस्याशु कलहं सुतबांधवाः। प्रष्टव्या योषितश्चास्य परपुंसि रताः पृथक्। अविज्ञातपुरुषेण घा
तितस्य संबंधिनः सुताः प्रत्यासन्नाश्च बांधवाः केनास्य कलह जातिरिति कलहमाशु प्रष्टव्याः ततः तथा मृतस्य संबंधिन्यो योषि
तो याश्च परपुंसि रता व्यभिचारिण्यः ता अपि पृष्टव्याः कथं पृष्टव्या इत्याह॥ स्त्रीद्रव्यवृत्तिकामो वा केन वायं गतः सह। मृत्युदेशसमा
सन्नं पृच्छेद्वापि जनं शनैः॥ किमयं स्त्रीकामो वा द्रव्यकामो वा वृत्तिकामो वा तत्र कैर्यौ किं संबंधिन्या वा स्त्रिया मस्या नितरतिरासात्केन स्त्री

न्वादृक्येप्राप्तिः कुतोवावत्रिकामःकेनवासह देवंगतस्गतइतिनानाप्रकारंव्यभिचारिणोपोषितः प्रपक्षप्रयकाविस्वास्पपृष्टव्याःत
थामरणदेशनिकटावर्त्तिनोगोपालकाद्याभेजनास्तेपिविश्वासपूर्वंप्रष्टव्याः एवंनानाप्रकारैः प्रश्नैर्हंतारंनिश्चित्यतदुचितोदंडोविधात
व्यः किंच। क्षेत्रवेश्मवनग्रामविवीतखलदाहकाः राजपत्न्यभिगामीचदग्धव्यस्तुकाटाग्निना। क्षेत्रंपक्वफलसस्यापेतंवेश्मगृहंवनम
टवीक्रीडावनंवाग्रामंवा। विवीतमुक्तलक्षणंखलंवापेदहेतिपश्चराजपत्नींमभिगच्छतितान्सर्वान्कटैर्वीरणमयैर्वेष्टयित्वादाहयेत।
154 क्षेत्रादिदाहकानांमारणादंडप्रसंगादंडविधानं। ॥ इतिस्तेयप्रकरणं। स्त्रीसंग्रहणाख्यंविवादपदंव्याख्यायते। प्रथमसाहसादि
दंडप्राप्त्यर्थंत्रैध्यातल्यंकपंव्यासेनविवृतं। त्रिविधंतत्समाख्यातंप्रथमंमध्यमोत्तमं। अदेशकालसंभाषानिर्जनेचपरस्त्रिय
कटाक्षावेक्षसांहास्यंप्रथमंसाहसंस्मृतं। प्रेषणंगंधमाल्यानांधूपभूषणवाससां। प्रलोभनंचान्नपानैर्मध्यमंसमुदाहृतं।
॥२५४॥ सहासनंविविक्तेतुपरस्परमपाश्रया। केशाकेशिग्रहश्चैवसमकंसंग्रहणंस्मृतं। स्त्रीपुंसयोर्मिथुनीभावः संग्रहणं। संग्रह
णज्ञानपूर्वकत्वात्केचिदुंडविधानस्यतत्ज्ञानोपायंतावदाहपुमान्संग्रहणेग्राह्यः केशाकेशिपरस्त्रियाःसद्योवाकामजैर्लिंगैः प्
रतिपत्तौद्वयोस्तथा। संग्रहणप्रवृत्तःपुमान्। केशाकेश्यादिभिर्लिंगैर्ज्ञात्वाग्रहीतव्यः। परस्याःकेशग्रहणपूर्विकाक्रीडाकेशाकेशि
तत्रतेनेदमितिसरूपइतिवन्हुव्रीहौसतिइचकर्मव्यतिहारइतिसमासांतइच्प्रत्ययः। अन्येषतामनुलुपात्तत्पाविवक्षितैः त
तश्चापमोर्थः परस्त्रीयास्सहकेशाकेशीक्रीडनेनाभिनवैःकरसहदशनादिक्षतव्रणैरागक्षतैर्लिंगैर्द्वयोःसंप्रतिपत्त्यावा।

ज्ञात्वा संग्रहणे प्रवृत्तो ग्राह्य इत्यर्थः। परस्त्रीग्रहणं नियुक्तावरुद्धादिव्युदासार्थं। किंच। नावीस्तनप्रावरणसक्थिकेशावमर्शनं।
न्यदेशकालसंभाषं सहैकस्थानमेव च॥ यः पुनः परदारपरिधानग्रंथिदेशकुचप्रावरणजघनमूर्द्धजहरादिस्पर्शनं साभिलाष
इवाचरति। तथा देशे निर्जने जनताकीर्णे वांधकारादौ काले संलापनं करोति परनार्या वा सहैकस्थाने सहैकमंचकादौ रिरंसये
वावतिष्ठते सोपि संग्रहणे प्रवृत्तो ग्राह्यः। एतच्चुम्बिताद्युपमाने दोषपरपुरुषविषये तरतरस्य तु न दोषः। यथाह मनुः। यस्त्वनाक्षा ९५
रितः पूर्वमभिभाषेत कारणात्। न दोषं प्राप्नुयात्किंचिन्न हि तस्य व्यतिक्रम इति। परस्त्रियास्पृष्टः क्षमेत तु असावपि ग्राह्य
इति तेनैवोक्तं। स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तया। परस्परस्यानुमते सर्वं संग्रहणं स्मृतमिति। पञ्चमपेपविदग्ध्याद्यस
कृदुक्तिमिति च तेन तिरस्कार्यया नङ्गगङ्जनसमक्षं स्वयं पत्युसावपि ग्राह्य इति तेनैवोक्तं। दर्पाद्वा यदि वा मोहाच्छ्लाघया वा स्वयं व
देत्। पूर्वमयं कृतेति तच्च संग्रहणं स्मृतमिति। प्रतिषिद्धयोः स्त्रीपुंसयोः पुनः संलापादिकरणे दंडमाह॥ स्त्री निषेधे शतं
दद्याद्द्विशतं तु दमं पुमान्। प्रतिषेधे तयोर्दण्डो यथा संग्रहणे तथा। प्रतिषिध्यते इति प्रतिषेध्यः पतिपुत्रादिभिर्निषेधनसह
संभाषणादिकं निषिद्धं तत्र प्रवर्त्तमाना स्त्री शतपणं दंडं दद्यात्। पुरुषः पुनरेवं निषिद्धप्रवर्त्तमानो द्विशतं दद्यात्। द्वयोरस्त्री
स्त्रीपुंसयोः प्रतिषिद्धप्रवर्त्तमानयोः संग्रहे संजाते वर्णानुसारेण यो दंडो वक्ष्यते स एव विज्ञेयः। एतच्च चारणादिस्त्रार्याव्य

तिरेकेण। नैष चारणदारेषु विधिर्नात्मोपजीविषु। सज्जयंति हि ते नारीर्निर्गूढाश्चारयंति च॥ इति मनुस्मरणात्। विवादमिह
नां संग्रहणे दंडमाह॥ स्वजातावुत्तमो दंड आनुलोम्ये तु मध्यमः। प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्तनं। चतुर्णामपि वर्णा
नां बलात्कारेण सजातीयगुप्तपरदाराभिगमने साशीतिपणसहस्रं दंडनीयः यदा त्वानुलोम्येनागुप्तां हीनवर्णास्त्रियमभिगच्छ
ति तदा मध्यमसाहसं दंडनीयः यदा पुनः सवर्णामगुप्तामानुलोम्येन वा गुप्तां व्रजति तदा मानवविशेषकृष्टैः सहस्रं ब्रा॥
ह्मणेन दंड्यो गुप्तां विप्रां बलाद्व्रजन् शतानि पंच दंड्यः स्यादिच्छंत्या सह संगतः। तयाः सहस्रं ब्राह्मणेन दंड्यं दाप्यो गुप्ते तु तेरड
॥१५५॥ ना शूद्रायां क्षत्रियविशोः सहस्रं तु भवेद्दम इति एतच्च गुरुसखिवचार्याव्यतिरेकेण द्रष्टव्यं। माता मातृष्वसा श्वश्रूर्मातुल
नी पितृष्वसा। पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा। दुहिताचार्यभार्या च सगोत्रा शरणागता। राज्ञी प्रव्रजिता
धात्री साध्वी वर्णोत्तमा च या। आसामन्यतमां गच्छन् गुरुतल्पग उच्यते। शिश्नस्योत्कर्तनात्तत्र नान्यो दंडो विधीयते इ
ति नारदस्मरणात् प्रातिलोम्ये उत्कृष्टवर्णस्त्रीगमने क्षत्रियादेः पुरुषस्य वधः। एतच्च गुप्ताविषयमन्यत्र तु धनदंडः
उक्तो वापि हितावेव ब्राह्मण्या गुप्तया सह। विप्रसुतौ शूद्रवद्दंड्यौ दग्धव्यो वा कटाग्निना ब्राह्मण्यपद्यगुप्तां तु सेवेतां वैश्यपा
र्थिवौ। वैश्यं पंचशतं कुर्यात् क्षत्रियं तु सहस्रिणं॥ इति स्मरणात्। शूद्रस्य पुनरगुप्तामुत्कृष्टवर्णस्त्रियं व्रजतो लिंगच्छे

दनसर्वस्वापहारी। गुप्तांतुव्रजातिस्तस्यैव धः सर्वस्वापहारा वितितेनैवोक्तं। भूदेशगुप्तामगमद्वा द्विजातवर्णवासन्। अगुप्तेकांग
सर्वस्वं गुप्तो सर्वेणगृह्यायतइति। नार्यः पुनर्हीनवर्णव्रजंत्याः कस्यैयोः आदित्यहणान्नसादेश्यकर्तने। आनुलोम्ये त्ववास
वर्णेवाव्रजंत्याः दंडकल्पः अपंचव धोद्धपदेशोशज्ञएवतस्यैवपालनाद्यविकारात। नहिद्विजातिमात्रस्याब्रह्मणः परास्त्रार्थ
मपिशस्त्रंनाददीतेतिशस्त्रग्रहणनिषेधात्पदातुरोक्ष्णा निवेदनकालविलंबनेनकार्यामितियाताशंकातदास्वपमेवज्ञात्वा
हत्यातशस्त्रं द्विजातिभिर्ग्राह्यं धर्मोपजोपरुध्यतों तथा। नाततायिवधेदोषोहंतुर्भवतिकश्चन। प्रकाशंवाप्रकाशंवामन्यु
स्तंमन्युमृच्छतीतिशास्त्रग्रहणाभ्यनुज्ञानाच्च। तथा। क्षत्रियवैश्ययोरन्यान्यस्याभिगमनेयथाक्रमंसहस्त्रप्रवाशतात्मकोदंड
वोदितव्यः। तदाहमनुः वैश्यश्चेत्क्षत्रियांगुप्तांवैश्यांवाक्षत्रियोव्रजेत्। योब्राह्मण्यामगुप्तायांतावुभौदंडमर्हतइति। परदारप्र
संगात्कन्यापामपिदंडमाह। अलंकृतांहरेत्कन्यामुत्तमंत्वन्यथाधमं। दंडंदद्यात्सवर्णासुप्रातिलोम्येवधः स्मृतः इतिविवा
हात्निमुदग्नीच्नूतामलंकृतांसवर्णांकन्यामाहरन्दुउत्तमसाहसंदंडनीयः। तदनन्तिमुखासवर्णांहरन्प्रथमसाहसे
ऊक्तोव्रवर्णजांकन्यामपहरतः पुनः क्षत्रियादेर्वधएववादंडविधानाद्याअपहर्तुः सकाशादाक्षिद्यान्यस्मैदेयेतिगम्यते।
आनुलोम्येपहरणेदंडमाह। सकामास्वनुलोमासुनदोषस्त्वन्यथादमः। परिसानुरागोहानवर्णांकन्यामपहरतितत
दादोषाच्नावान्नदंडः। अन्यथात्वनिच्छंतीमपहरतः प्रथमसाहसोदंडः। कन्यादूषणेदंडमाह। दूषणेनुकरच्छेदऊत्त

प्रायंवधस्तया।अनुलोमाष्वित्यनुवर्त्तते।यद्यमांकन्यावलात्कारेणनरवक्षतादिताददूषयतितदातस्यकरच्छेत्तव्यः।य
दापुनस्तामेवांगुलिप्रक्षेपेणयोनिक्षयंकुर्वन्नदूषयतितदामनुः।स्त्रीषट्शतंहितांगुलिच्छेदः।अभिषह्यतुयः।कन्यांकुर्याद्दर्पे
णमानवः।तस्याशुकर्त्त्येअंगुल्यौदंडंवार्हतिषट्शतमिति।यदापुनःसानुरागापूर्ववद्दूषयतितदापितेनैवविशेषउक्तः।स
कामांदूषयानस्तुल्योनांगुलिच्छेदमर्हति।द्विशतंतुदमंदाप्यःप्रसंगविनिवृत्तयइतिर्यदापुनःकन्यैवकन्यांदूषयतिविद्ध
स्यावातेत्रापिविशेषस्तेनैवोक्तः।कन्यैवकन्यांयाकुर्यात्तस्यास्तुद्विशतोदमः।यातुकन्यांप्रकुर्यात्स्त्रीसासद्योमौंड्यम
र्हति।अंगुल्योरेवचच्छेदंखरेणोद्वहनंतथेतिकन्यांकुर्यादितिकन्यांयोनिक्षतवतींकुर्यादित्यर्थः।यदापुनरुत्कृष्टजाती
॥१५६॥ यांकन्यामविशेषात्सानुरागामकामांवागच्छतितदाहीनस्यक्षत्रियादेर्वधः।उत्तमांसेवमानस्तुजघन्योवधमर्हती।
तिमनुस्मरणात।यदासवर्णांसकामामागच्छति।तदागुदकृंगोमिथुनंतत्पित्रेदद्यात।मुक्तोयदाछतिपितिरत्तु ॥१५६॥
ल्कोमानिच्छतिदंडरूपेणतदेवराज्ञेदद्यात।सवर्णांकामांगच्छातावधएव।यथाहमनुः।शुल्कंदद्यात्सेवमानःसमा
मिच्छेत्पितायदियाकामादूषयेत्कन्यांससद्योवधमर्हतिसकामांदूषयंस्तुल्योवधंप्राप्नुयान्नरइति।किंच।
शतंस्त्रीदूषणेदद्याद्द्वितुमिथ्याभिशंसिता।पशून्गच्छन्शतंदाप्योहीनस्त्रीगांचमध्यमंस्त्रीशब्देनात्रप्रकृतत्व

त्कन्यावमर्शपतेतस्यांयदि कश्चिद्विद्यमानानेवापस्मारराजयक्ष्मादिदीर्घकुत्सितरोगसंसृष्टमैथुनत्वादिदोषानयुक्

श्यद्यमकन्येति दूषयति असौ शतं दाप्यः। मिथ्या। निशंसनेपुनरविद्यमानदोषाविष्करणे हेतुः शते दापनीयः। गोव्यतिरि

क्तपशुगमने तु शतं दाप्यः। यः पुनः हीनां स्त्रियमंत्यावसायिनीमविशेषात्सकामामकामांवा गोंवा निगच्छति असौ मध्य

मसाहसं दंडनीयः। साधारणस्त्रीगमने दंडमाह। अवरुद्धासु दासीषु भुजिष्यासु तथैव च। गम्यास्वपि पुमान्दाप्यः

पंचाशत्पणिकं दमं। गच्छन्नित्यनुवर्तते। उक्तलक्षणवर्णस्त्रियो दास्यस्ताः। एवं स्वामिना शुश्रूषाहा। निवृद्दासार्थं गृ

ह एवस्थातव्यमित्येवं पुरुषांतरोपभोगतो निरुद्धा अवरुद्धा पुरुषनियतपरिग्रहा भुजिष्याः पदी दास्योऽनवरुद्धा भुजि

ष्यावा न वेपुस्तदातासु तथा वर्णबाह्यश्वपास्वैरिणीतामपि साधारणस्त्रीगणनभुजिष्याणिगृहणं तासु च सर्वासु पुरुषः साध

रणतया गम्यास्वपि गच्छन्पंचाशत्पणं दंडनीयः परपरिग्रहीतत्वेन तासां परदारतुल्यत्वात्। शरातत्त्वस्यश्चमुक्तं नारदेन।

स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी च याः। गम्याः स्युरानुलोम्येन स्त्रियो न प्रातिलोम्यतः। आस्वेव तु भुजिष्यासु दो

षः स्यात्परदारवत्। गम्यास्वपि हि तास्वेव यास्ताः सपरिग्रहा इति। निष्कासिनी स्वाम्यनवरुद्धा दासी। ननु स्वैरिण्यादीनां

साधारणतया गम्यत्वाभिधानमयुक्तं न हि ज्ञातितः शास्त्रतो वा कश्चिल्लोके साधारणा स्त्रियः उपलभ्यंते तथा हि स्वै

रिण्या दास्यश्चतावद्ब्राह्मण्याद्विपाएव। स्वैरिण्यापतिं हित्वा सवर्णं कामतः श्रयेत्परं वर्णिनामानुलोम्येन दास्यं न प्राति

लोमइतिमनुस्मरणात्। नचवर्णस्त्रीणांपत्यौजीवतिमृतेवापुरुषांतरोपभोगोघटते। दुःशीलः कामवृत्तोवागुणै
र्वापरिवर्जितः। परिचर्यः स्त्रियासाध्वीसततंदेववत्पतिः कामंतुक्षपयेद्देहंपुष्पमूलफलैः शुभैः। नतुनामापिगृह्णीयात्
त्पत्यौप्रेतेपरस्यत्वितिनिषेधस्मरणात्। नापिकन्यावस्थायांसाधारणत्वंपित्रादिपरिरक्षितायाः कन्यायाएवदानोप
देशात्। दात्रभावेपितथाविधायाएवस्वयंवरोपदेशात्। नवदासीत्वाभावात्स्वधर्माधिकारव्याप्तिः। पारतंत्र्यंहिदास्यंन
147 स्वधर्मपरित्यागः। नापिवेश्यासाधारणीवर्णानुलोमजव्यतिरेकेणगम्याजात्यंतरासंभवात्। तद्दंतः पातित्वेच
॥१५७॥ पूर्ववदेवाचगम्यत्वंप्रतिलोमजत्वेतुतासांनितरामगम्यत्वं। अतः पुरुषांतरोपभोगेतासांनिंदितकर्माभ्यासे
नपातित्यात्पतितसंसर्गस्यवानिषिद्धत्वान्नस्वकल्पपुरुषोपभोग्यजोगम्यत्वं। सत्यमेवंकिंत्वत्रस्वैरिण्या। ॥१५७॥
द्यपभोगोपिजारादिरक्षकराजदंडभयादिहेतुदोषाभावाद्गम्यत्ववाचोयुक्तिः। दंडाभावश्चावरुद्धासुदासीष्वि
तिनियतपुरुषपरिग्रहोपाधितोदंडविधानात्तदुपाधिरहितास्वेषांदंडानुक्तेः स्वैरिण्यादीनांपुनर्दंडाभावोपिविधानाभावात्क
न्याभंजकंतीमुक्त्वांनकिंचिदपिदापयेदितिलिंगदर्शनाच्चावगम्यते। प्रायश्चित्तंतुस्वधर्मेस्खलननिमित्तंगम्यानांउद्रणेनावाविय
वाद्रुव्यत्वा। यत्पुनर्वेश्यानांजात्यंतरासंभवेनवर्णातः पातित्वमनुमानादुक्तं वेश्यावर्णानुलोमाद्यतः पातित्यमनुपपन्नंजात्यास्व
यत्वाद्ब्राह्मणजातिवदिति। तन्न। कुंडगोलकादिभिरनैकांतिकत्वात्। अतोवेश्यारव्याकाचिज्जातिरनादिर्वेश्यायामुत्पद्यते

समानजातेर्वा पुरुषाद् उत्पन्ना पुरुषसंभोगवर्ज्जिर्ते र्वेश्येति ब्राह्मणादिवल्लोकप्रसिद्धिवशाद् अन्यपगमनापंनत्वनिर्मूलेयं प्रसिद्धः स्म
र्यते तथा। स्कंदपुराणे पंचचूडा नाम काश्चन नार्यः सस्ताः सैताति र्वेश्या परव्यापं च मा जातिरिति अतस्तासां निपतपुरुषपरिणयवि
नाविधि विधर तपा स्मृतौ नोक्ष ख ज्ञाति पुरुषाभिगमनेनादृष्टदोषा नापि दंडस्तासु चानवरुद्धासु गच्छतां पुरुषाणां प्रायश्चि
त दंडस्तत्पाप्यहृष्ट दोषा स्सेच त्वदरा नियतः सदेति निषमात्पन्नु वेश्याभिगमने प्राजापत्यं विधीयत इति प्रायश्चित्तस्मरणा
च्चेति निरवद्यं अवरुद्धसु दासीष्वित्यनेन दासी स्वैरिण्यादिभुजिष्यागमने दंडविधानात्तत्स्वभुजिष्यासु दंडो नास्तीत्यर्थो
दृष्टेतस्यापवादमाह। प्रसह्य दास्यभिगमे दंडो दशपणः स्मृतः। बहूनां यद्यकामासौ चतुर्विंशतिकः पृथक्। पुरुषसंभोगाद्वि
विकासु दासी स्वैरिण्यादिषु मुल्यादानविरहेण प्रसह्य बलात्कारेणाभिगच्छतो दशपणो दंडः। यदि च हवरकामामनिच्छन्तीं बलात्
त्कारेणाभिगच्छंति तर्हि प्रत्येकं चतुर्विंशतिपणपरिमितं दंडनीयः। यदा पुनस्तदिच्छया न्याडिं दत्वा परस्य दन्निच्छतां पामि बल
लाभ्दजातितदातयामपि न दोषः यदि व्याधाव्यान्नि न्वबस्तस्या नस्यात्। व्याधितासंभ्रमाव्यग्रा राजकर्मपरायणा। आमंत्रिता
चेन्नागच्छेदंड्या वडवा स्मृता इति नारदवचनात्। गृहीत्वा वेतनं वेश्या नेच्छन्ती द्विगुणं वहेत्। अगृहीते समं दाप्यः पुमानप्ये
वमेव हि। यदा तु मुल्यं गृहीत्वा पण्यस्त्री स्वस्था पि यदि नेच्छति तदा मुल्यं द्विगुणं दद्यात्। तया मुल्यं दत्वा स्वस्थस्य पुरुषस्य त्व
पमनिच्छतः मुल्यहानिरेव। मुल्यं गृहीत्वापायस्त्री नेच्छन्ती द्विगुणं वहेत् अनिच्छन् दत्तमुल्योपि मुल्यहानिमवाप्नुयादिति

तेनैवोक्तं। तयान्योपि विशेषस्तेनैव दर्शितः अप्रयच्छंस्तथा शुल्कमनुरूपं पुमान् स्त्रियः। आक्रमेण च संगच्छन् घातदंतनखादि
भिः अयोनौ वापि गच्छेद्यो वहन्निर्वापि वासयेत्। शुल्कं मध्यगुणं दाप्यो विनयं तावदेव तु। वेश्याः प्रधाना यास्तत्र कामुकास्त
158 द्गृहोषिताः तत्समुत्थेषु कार्येषु निर्णयं संशये विदुरिति। किंच। अयोनौ गच्छतो योषां पुरुषं वाभिमेहतः चतुर्विंशतिको दंड
स्तथा प्रव्रजितागमे। यस्तु स्वैरं पायेयवा मुखादावभिगच्छति पुरुषं वाभिमुखं मेहति तथा प्रव्रजितां वा गच्छति तदा चतुर्विं
शतिपणान् दंडनीयः। अगम्याभिगमने त्वांकभकवधेन प्रकाशयेत् शूद्रस्त्वपात्य एवस्यादंतस्यापीनमेव धः। अत्याचांड
लादिगमने त्वेवाशिकान् प्रायश्चित्तानभिमुखान् सहस्रं त्वंत्यजास्त्रियइतिमनुवचनात्पणसहस्रं दंडयित्वा कुवधेन
॥स्मृ॥ कुत्सितवधेन नगाकरेण कपित्वा स्वराष्ट्रान्निर्वासयेत्। प्रायश्चित्ताभिमुखस्य पुनर्दंड एव। शूद्रः पुनश्चांडाल्यभिग
मनेत्य एव चंडाल एव भवति। अंत्यजस्य पुनश्चांडालादेरुत्कृष्टजातिस्त्र्यभिगमने वध एव॥ ॥इति स्त्रीसंग्रहप्रक ॥स्मृ॥
१५८॥ रणं॥ व्यवहारप्रकरणमध्ये स्त्रीपुंसयोगाख्यमप्यपरं विवादपदं मनुनारदाभ्यां विवृतं। तत्र नारदः। विवाहादि वि १५८॥
धिः स्त्रीणां यत्र पुंसां च कल्प्यते। स्त्रीपुंसयोगसंज्ञं तद्विवादपदमुच्यते इति मनुरप्याह। अस्वतंत्राः स्त्रियः कार्याः पुरुषैः स्वै
र्दिवानिशं। विषयेषु च सज्जंत्यः संस्थाप्या ह्यात्मनो वशा इति। यद्यपि स्त्रीपुंसयोः परस्परमर्थिप्रत्यर्थितयान्(?)पशामकं

व्यवहारोनिषिद्धस्तथापिप्रत्यक्षेणकेणपरपरयावाविदितेतयोःपरस्परातिचारेदंडादिनादंपती।निजधर्मवर्गेराज्ञास्थाप
नीयौ।इतिरथ्यादासत्वाग्न्नवतातिव्यवहारप्रकारणेराज्ञधर्मम्ध्येद्व्यस्यस्त्रीपुंसज्ञातस्योपदेशः एतच्चविवाहप्रकरणएवसप्र
पंचप्रतिपादितमितिग्रंथगौरवेणनपुनरत्रोक्तं॥संप्रतंप्रकीर्णकाख्यंव्यवहारपदंप्रस्तूयते।तल्लक्षणंचकथितंनारदेन॥प्रकी
र्णकेषुविज्ञेयाव्यवहारान्नृपाश्रयाः राज्ञामाज्ञाप्रतीघातस्तत्कर्मकरणंतथा।पुरप्रदानंसंभेदःप्रकृतीनांतथैवच।पाषंडिनै
गमश्रेणिगणधर्माविपर्ययः।पितापुत्रविवादश्चप्रायश्चित्तव्यतिक्रमः।प्रतिग्रहविलोपश्चकोपआश्रमिणामपि।वर्णसंक
रदोषश्चतद्वृत्तिनियमस्तथा।नदृष्टंयच्चपूर्वेषुसर्वंतत्स्यात्प्रकीर्णकइति।प्रकीर्णकेविवादपदेप्येविवादाराज्ञामाज्ञोल्लं
घनतदाज्ञाकरणादिविषयास्तेनृपसमवायिनः नृपएवतत्रस्वमत्याचारव्यपेतमार्गवर्तमानानांप्रतिकूलनोमास्थाप्य
व्यवहारनिर्णयंकुर्यात्।एवंचवदतापोनृपाश्रयोव्यवहारःतत्प्रकीर्णकमित्यर्थात्सूचितोभवति।तत्रापराधदंडानिशे
षमाह॥न्यूनंवाभ्यधिकंवापिलिखेद्योराजशासनं।योलिखतिपाश्चपारदारिकंचोरंवागृहीत्वाराज्ञेनार्पयित्वास्वयं
मुंचतितावुत्तमसाहसंदंडनीयौ।प्रसंगान्नृपाश्रयव्यतिरिक्तोव्यवहारविषयमपिदंडमाह।अत्रचक्षेपेणदंडोहृष्य
दंडउत्तमसाहसं।मध्यमंक्षत्रियंवैश्यंप्रथमंशूद्रमधिकंमूत्रपुरीषादीनांक्षेपणेनेहणंब्राह्मणंदूष्यान्नपानादीनि
पारदारिकचौरंचामुंचतोदंडउत्तमः।राज्ञःदत्तभूमेर्लिखितस्यपरिमाणान्न्यूनत्वमाधिक्यंवाकारयन्राज्ञःशासनं॥३॥

अन्यस्वरूपेण वा दूषयित्वा ख्यापयित्वोत्तमसाहसं दंड्यो भवति क्षत्रियं पुनरेव दूषयित्वा मध्यमं वैश्यं दूषयित्वा प्रथमं शूद्रं दू
दूषयित्वा प्रथमसाहसस्यार्द्धं दंड्यो भवतीति संबंधः अनेनाधमजनस्य दूषणे दोषतारतम्यात् दंडतारतम्यमूहनीयं। किंच। कूट
स्वर्णव्यवहारी विमांसस्य च विक्रयी। अंगहीनश्च कर्त्तव्यो दाप्यश्चोत्तमसाहसं। रसवेधाद्यापादितवर्णोत्कर्षैः कूटैः स्वर्णैर्व्य
वहारशीलः पुरुषः श्वशृगालादीनां विमांसस्य कुत्सितमांसस्य स्वाद्यसंबंधनविक्रयशीलः। नासिकादिः चशब्दात् कूटरजतादिव्य
वहारी च ते सर्वे प्रत्येकं नासाकर्णकरैः त्रिभिरंगैर्हीनाः कार्याः चशब्दात् अंगच्छेदनसमुच्चितमुत्तमसाहसं दंडं दाप्याः यत्पुन
159
मनुनोक्तं सर्वकंटकपापिष्ठं हेमकारं तु पार्थिवः। प्रवर्तमानमन्याये छेदयेल्लवशः क्षुरैरिति तत् देवब्राह्मणराजस्वर्णवि
१५९॥ षयं। विषयविशेषे दंडाभावमाह। चतुष्पादकृतो दोषो नापेहीति प्रजल्पतः। काष्ठलोष्टेषुपाषाणबाहुयुग्यकृतस्तथा॥ च १५९॥
तुष्पादैर्गोगजादिभिः कृतो यो दोषो मनुष्यमारणादिरूपः सोऽगवादित्वाभिनेतारं न भवत्यपसरेति प्रकर्षेणोच्चैर्घोषयमाणस्य
तथा काष्ठलोष्टेषुपाषाणक्षेपणेन बाहुना युग्येन च युगं च वहताऽश्वादिना कृतो यः पूर्वोक्तो दोषः सोपि काष्ठादि
क्षेप्तारं न भवति अपसरेति प्रजल्पतः काष्ठादिक्षेपणे हि हिंसायां दोषाभावकथनं दंडाभावप्रतिपादनार्थं प्रायश्चि
त्तं पुनरबुद्धिपूर्वककरणनिमित्तमस्त्येव। काष्ठादिग्रहणं च शक्तितोमरादेरुपलक्षणार्थं। किंच। छिन्ननस्येन यानेन तथा
भग्नयुगादिना। पश्चाच्चैवापसरता हिंसने स्वाम्यदोषभाक्॥ छिन्नासिकारज्जुर्नस्या छिन्ना नाशा करादिपुष्टबलीवर्दनस्यारज्जु

योऽस्मिन्याने नछिन्ननस्यं शकटादि स्तेन। आदिग्रहणाद्भग्नाक्षचक्रादिना यानेन पश्चात्स्खलतोपसरतोऽन्यवशाद्रात्रिप्रतिगप
गच्छता प्रतिमुखं वागच्छता च मनुष्यादिहिंसने स्वामी प्राजको वा न दोषभाग्भवति अतत्प्रयत्नजनितत्वाद्धिंसनस्यात
था च मनुः छिन्ननस्ये भग्नयुगे तिर्यक्प्रतिमुखागते। अक्षभंगे च यानस्य चक्रभंगे तथैव च। छेदने चैव यन्त्राणां योक्त्र
रश्म्योस्तथैव च। आक्रोशे चाप्यपैहीति न दण्डं मनुरब्रवीत्॥ इति। अक्षिप्रायोस्वामिनो दण्डमाह। शक्तो ह्यमोक्षयन्स्वामी द
ष्ट्रिणां शृंगिणां तथा। प्रथमं साहसं दण्ड्यो ~~मनुष्यवादिति~~ विक्रुष्टे द्विगुणं तथा॥ अप्रवीणप्राजकप्रेरितैर्दंष्ट्रिशृंगिगजादि
भिः शृंगिभिर्गवादिभिर्बध्यमानः ~~समर्थो पि तत्स्वामी प्रथमो~~ मोक्षयेत् तदा अकुशलप्राजनिकाभिपीडनेन निमित्तं प्रथम
साहसं दण्डं दद्यात्। यदा तु मारितोऽहमिति विक्रुष्टेऽपि न मोक्षयति तदा द्विगुणं यदा पुनः प्रवीणमेव प्राजकं प्रेरयति तदा प्रा
जक एव दण्ड्यो न स्वामी। यथा मनुः प्राजकश्चेद्भवेदाप्तः प्राजको दण्डमर्हति। प्राजकोऽपि तदाप्तोऽसौ निपुणः प्राणिविशेषा
च्च दण्डविशेषः कल्पनीयः। यथा मनुः मनुष्यमारणे क्षिप्रं चौरवत्किल्बिषं भवेत्। प्राणभृत्सु महत्स्वर्धं गोगजोष्ट्रहया
दिषु॥ क्षुद्रकाणां पशूनां तु हिंसायां द्विशतो दमः। पंचाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु॥ क्षुद्रकाणां पशूनां तु दण्डः स्या
त्पंचमाषकः। माषकस्तु भवेद्दण्डः श्वसूकरनिपातने॥ इति। किंच। जारं चौरेत्यभिवदन्दाप्यः पंचशतं दमं। उपजीव्य ध
नं मुंचंस्तं देवाष्टगुणं स्मृतं। स्वशाकलंकताताना नारं परिदारिवं चैव निर्दिशेत्यभिवदन्पंचशतं पणानां पंचशतानि

यास्मिन्द्रव्येसतथोत्क्रान्तस्तं दमं दाप्यः। पः पुनर्जारहस्ताद्धनमुपजीव्य उत्कोचरूपेण गृहीत्वा जारं मुंचत्यसौ यावद्गृहीतं ताव
द्दष्टगुणं कृत्वा दंडं दाप्यः। किंच। राज्ञो निष्प्रयुक्तारं तस्यैवाक्रोशकं तथा। तन्मंत्रस्य च भेत्तारं छित्वा जिह्वां प्रवासये
त्। राज्ञो निविष्टस्यानामिमतस्य। मित्रस्तोत्रादेः प्रकर्षेण च्यवेयोच्च्यावयितारं तस्यैव राज्ञ आक्रोशकारिकं निंदाकर
णशीलं। तदीयस्य च मंत्रस्य त्वराद्युद्धिहेतोः परराष्ट्रक्षेपकस्य वाचने तारम भिन्नकर्णे जयतो जिह्वामुत्कृत्य स्व
राष्ट्रान्निष्कासयेत्। कोशापहरणं पुनर्वध एव। राज्ञः कोशापहर्तृश्च प्रतिकूलेष्ववस्थितान्। घातयेद्विविधैर्द
ंडैररीणां चोपजापकानिति मनुस्मरणात्। विविधैर्वधैः सर्वस्वापहारांगच्छेदवधैरित्यर्थः। सर्वस्वापहारोपिपत्नी १६०॥
॥१६०॥ स्वजीवनोपकरणं तन्नापहर्तव्यं चौरोपकारिणां विना। यथा नारदः। आयुधान्यायुधीयानां वाह्यादीन्वाहजीवि
नां। वेश्यास्त्राभरणं मल्लकारान्वाद्यातोद्यादि तद्विदां। पण्यस्यापकरणं योऽन्नवांतिकारवः। सर्वस्वहरणेप्येतन्नराजा
हर्तुमर्हतीति। ब्राह्मणस्य पुनर्न शारीरो वा ब्राह्मणे दंड इति निषेधात् वधस्थाने शिरोमुंडनादिकं तव्यं। ब्राह्मणस्य वधे
मौंड्यं पुरान्निर्वासनं अंके। ललाटे चाभिशस्तांकः प्रयाणं गर्दभेन त्विति मनुस्मरणात्। किंच। मृतांगलग्नविक्रेतुर्गु
रोस्ताडयितुस्तथा। राजयानासनारोढुर्दंड उत्तमसाहसः। मृतशरीरसंबंधिनो वस्त्रपुष्पादेर्विक्रेतुर्गुरोः पित्राचा

र्थयोरुक्तः। पितुस्तथा राज्ञानुमतिं विना तद्यानं शय्यादि आसनं सिंहासनं चारोहेत् तस्योत्तमसाहसो दंडः। किंच॥
द्विनेत्रच्छेदे दिनो राज्ञा द्विजस्य देशात्क्तस्तथा विप्रत्वेन च शूद्रस्य जीवतो दश। दमः यः पुनः क्रोधादिना परद्रव्यं नेत्र
द्वयं भिनत्ति। यश्च द्वेषेतिः शास्त्रविरुद्धगुर्वादिहितेषु व्यतिरिक्तो राज्ञो द्विजानि षट्संवत्सरांते तव राष्ट्रप्रकृतिर्जीवि
ष्यतीत्यादिरूपमादेशं करोति। तथापः शूद्रो भोजनार्थं यज्ञोपवीतादि ब्राह्मणलिंगानि धारयति तस्याष्टशते
दमः। अष्टौ शतानि यस्मिन्न त्वेस तथोक्तः। श्राद्धभोजनार्थं पुनः शूद्रः विप्रवेषधारिणस्तप्तशलाकया पापयज्ञो॥
पवीतं बहुपुण्यान्लिखेत् इति स्मृत्यंतरोक्तं द्रष्टव्यं वत्सर्थं तु ब्राह्मणलिंगधारिणो वध एव। द्विजातिलिंगिनः शू
द्रान्घातयेदिति स्मरणात्। रागलोभादिनान्यथा व्यवहारदर्शने दमाह॥ दुर्दृष्टस्तु पुनर्दृष्ट्वा व्यवहारान्नृ
पेण तु। सभ्याः सजयिनो दंड्याः विवादाद्द्विगुणं दमं। दुर्दृष्टान्स्मृतिचारप्राप्ताधर्मोक्तं येन न रागलोभादिना
रसभ्यग्विचारितत्वेनाशंक्यमानान्व्यवहारान्पुनः स्वयं सम्यग्विचार्य निश्चितदोषाः पूर्वसभ्याः जयिसहिताः प्र
त्येकं विवादेयो दमः पराजितस्य तं द्विगुणं दाप्याः। अप्राप्ततद्दंडविधेपरत्वाद्वचनस्य रागलोभादित्यादिस्मृतो

केनापीनरसैकथंपदापुनः सासिदोषेणव्यवहारस्यदुर्दृष्टतातसाक्षिणएवदंड्या नजयीनापिसभ्याः पदा
तुराज्ञानुमत्याव्यवहारस्यदुर्दृष्टत्वेतदासर्वएवराज्ञसहिताः सभादयो दंडनीयाः पादोगच्छतिकर्तारं पादः सा
क्षिणमृच्छति। पादःसभासदः सर्वान्पादोराजानमृच्छतीतिवचनात् एतच्चप्रत्येकंराजादीनांदोषप्रतिपादन
परंनपुनरेकस्यैवपापापूर्वस्यविभागायकर्त्तसमवायिफलजनकस्वभावत्वादपूर्वस्य। न्यायतोनिर्णी
तव्यवहारस्यप्रत्यावर्त्तयितुर्दंडमाह। योमन्येताजितोस्मीतिन्यायेनापिपराजितः तमायांतंपुनर्जित्वा
॥१६२॥ दापयेद्द्विगुणंदमं। यः पुनर्न्यायमार्गेण पराजितोप्यद्भुत्वान्नाहंराजितोस्मीतिमन्यतेतमायांतंकूटले
ख्याधिकपन्यासेनपुनर्धर्माधिकरणमधिष्ठितंतद्धर्मेणपुनःपराजनीत्वाद्विगुणंदंडंदापयेत्। नारदेनाप्यु ॥१६१॥
क्तं। तीरितंचानुशिष्टंचयोमन्येतविधर्मतः द्विगुणंदंडमास्थायतत्कार्यंपुनरुद्धरेदिति तीरितंसाक्षिलेख्या
दिनिर्णीतमनुद्धृतंदंडमनुशिष्टमुद्धृतदंडंपर्यंतंनीतमितियावत् यत्पुनर्मनुवचनंतीरितंचानुशिष्टंच
यत्रक्वचनविद्यते। कृतंतद्धर्मतोज्ञेयंनतत्प्राज्ञोनिवर्त्तयेदितितदर्थप्रत्यर्थिनोरन्यतरवचनंतीरितंच।

नु शिष्टश्च पञ्चधा च न विद्यते। कृतं तद्धर्मतो ज्ञेयं न तत्प्राज्ञो निवर्त्तयेदिति तद्‌र्थि प्रत्यर्थिनोरन्यतरवचना
द्व्यवहारस्याधर्मतो वृत्तत्वाशंकायां पुनर्द्विगुणं दंडं प्रतिज्ञापूर्वकं व्यवहारं प्रवर्त्तयेत् न पुनर्द्धर्मतो वृत्तत्वा
न्निर्णये परिराज्ञा लोभादिना प्रवर्त्तनीयं इत्येवं परं। यत्पुनर्न्निर्णयान्तरेण चिन्त्यापाद्येतं कार्यं निर्वर्तीतं तदापस
न्यायकरा दंडेन धर्म्म्यपथे संस्थापनीयं। न्यायापेतं पदं यं न राज्ञा ज्ञानकृतं भवेत् तद्‌प्यन्याय विहितं पुनन्यां
ये निवेशयेदिति स्मरणात्। अन्यायगृहीतदंडधनस्य गतिमाह। राज्ञाऽन्यायेन यो दंडो गृहीतो वरुणाय तं। नि
वेद्य दद्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतं। अन्यायेन यो दंडो राज्ञा लोभादिना गृहीतस्तं त्रिंशद्गुणीकृतं वरुणायाद
मिति संकल्प्य ब्राह्मणेभ्यः समं दद्यात्। यस्माच्च दंडनृपेण यावद्गृहीतमन्यायेन तावत्तस्मै प्रतिदेयं इतरथाऽपहा
रदोषप्रसंगात् अन्यायदंडग्रहणे पूर्वं स्वामिनः स्वत्वविच्छेदाभावात्। उक्तेमापपदस्येयं शिष्यस्य कृतिरात्मनः।
धर्मशास्त्रस्य विवृतिर्विज्ञानेश्वरयोगिनः॥ ॥ इति याज्ञवल्क्यमुनिशास्त्रगतव्यवहारकांडविवृति विहिता न्स
ज्जुसंमितार्थपदगापनामधेरागजारवितताऽर्थवती॥ २॥ गंभीरात्मिः प्रसन्नाभिर्वाग्भिर्नानन्दमिता दर
अनल्पार्थाभिरल्पाभिर्विवृतिर्विहिता मया॥ ३॥ इति याज्ञवल्क्यमुनिशास्त्रगता विवृतिर्न्निकस्य विहिता वि

दुग्धः प्रमिताक्षरापि विपुलार्थवती परिषिंचति श्रवणयोरमृतं ॥४॥ गंभीराभिः प्रशस्ताभिर्वाग्भिर्नाम्ना मि

ताक्षरा ॥ अनल्पार्था मि नासीदस्ति भविष्यति क्षितितले कल्याण कल्पं पुरं नो दृष्टः श्रुत एव वा क्षितिपति

श्रीविक्रमार्कोपमः ॥ विज्ञानेश्वरपंडितो न भजते किं चान्यदन्योपमं आकल्पं स्थिरमस्तु कल्पलतिका

कल्पं तदेतत्त्रयं ॥ इति प्रकीर्णप्रकरणं ॥७॥ ॥इति श्रीमत्पद्मनाभभट्टोपाध्यायात्मजस्य श्रीमत्परमहंसप

रिव्राजक विज्ञानेश्वरभट्टारकस्य कृतौ ऋजुमिताक्षरायां याज्ञवल्क्यधर्मशास्त्रविवृतौ द्वितीयोध्यायः ॥ ॥शुभमस्तु॥

६२॥ संवत् १७४४ शाका १६०९ लिषतं नयमल पांडे रामपुत्रः ॥ लावगल ॥ दवेषवेरबाल ॥ १६२॥

अस्मिन्नध्याये प्रकरणानुक्रमणिका ॥ व्यवहारमातृकाप्रकरणं ॥१॥ प्रतिभूप्रकरणं ॥२॥ ऋणादानप्रकरणं ॥३॥

॥ निक्षेपप्रकरणं ॥४॥ २॥